# SAṄKĀYA PATRIKĀ

## ŚRAMAṆAVIDYĀ

[Vol. 1]

Board of Editors

Prof. Jagannath Upadhyay, Śhri Ram Sankar Tripathi
Dr. Brahmadev Narayan Sharma, Dr. Phool Chandra Jain
Sri Buddhi Vallabh Pathak

Edited by
Dr. GOKUL CHANDRA JAIN

Supervisor : Dr. Bhāgiratha Prasāda Tripāthī 'Vāgīśa Śāstrī
*Director, Research Institute*

Publication Officer : Dr. Hariś Chandra Mani Tripāthī

SAMPURNANAND SANSKRIT VISHVAVIDYALAYA, VARANASI
1983

*Published by*

**Director, Research Institute**
**Sampurnanand Sanskrit Vishvavidyalaya**
**Varanasi-221002**

*Available at*

Sales Department
Sampurnanand Sanskrit Vishvavidyalaya
Varanasi-221002

First Edition : 1000 capies
Price : Rs. 32.00

*Printed at*

**Tara Printing Works**
**Varanasi**

# संकाय पत्रिका

## श्रमणविद्या

[ भाग १ ]

सम्पादक मण्डल

**प्रो. जगन्नाथ उपाध्याय, श्री रामशङ्कर त्रिपाठी**
**डॉ. ब्रह्मदेवनारायण शर्मा, डॉ. फूलचन्द्र जैन**
**श्री बुद्धिवल्लभ पाठक**

**सम्पादक**

**डॉ. गोकुलचन्द्र जैन**

**पर्यवेक्षक :** डॉ. भागीरथप्रसाद त्रिपाठी 'वागीश शास्त्री'
निदेशक, अनुसन्धान संस्थान
प्रकाशनाधिकारी : डॉ. हरिश्चन्द्रमणि त्रिपाठी

**सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी**

**१९८३**

by the very same work and the *Jātakamālā* of Āryasūra. As the text was handled by a traditional monk, the importance of restoration becomes more authentic.

The *Taccaviyāro* of Vasunandi Suri, a Prakrit treatise dealing with the Jaina Philosophical concepts and code of conduct of a house-holder, has been edited from a single manuscript, and presented here for the first time. The text is divided into 11 chapters, each dealing with an independent topic of undisputable religio-philosophical importance. However the topics have inter-relation to each other while complete in itself. In the preface and in the Introduction good many details have been furnished. Attention has been drawn to some important points related to the restoration of ancient *āgamas*, which are lost, cronology of Ācaryas and History of Jaina Church. Some areas for interdisciplinary research have been suggested. The Prakrit text is presented with the cross reference of other works in the foot notes, which are not only important for comparative study but also will help in due course the scholars undertaking the difficult task of accounting the traditional *gāhāsutta*, which seems scattered in several ancient works, but lost as a whole Āgama.

The *Lokottaradharmadane Buddhasya dvātriṃśanmahāpuruṣalakṣaṇāni aśītyanuyañjanāni ca* edited and presented by Dr. N. H. Samtani with his Introduction, is a portion of a Buddhist Sanskrit text *Lokottara-dharmadānam*. The manuscript was located by the editor in the Darbar Library, Kathmandu (Nepal). Thirty two special characteristics which make the Buddha a superman, is a matter of significant importance. The list and explanation are found in many other Buddhist texts both in Pali and Sanskrit. The variations in order, terminology and explanation are but natural. The similar sixteen or twenty special characteristics, which make Mahavira the *Tīrthaṅkara*, and can make any one a *Tīrthaṅkara*, are elaborately depicted in Prakrit, Sanskrit and Apabhraṃśa texts of the Jaina Tradition. However they denote spiritual evolution and not the external signs. Gradual spiritual evolution in every previous birth till he becomes a *Tīrthaṅkara*, closely resembles with the concept of a *Bodhisattva*. Dr. Samtani has drawn the attention to the sources in early Pali texts as well as the Māhāyana literature. A comparative and analytical study of the subject can be an independent research project of high importance particularly in the light of the concept of total development of human personality which is one of the original contribution of the Śramaṇas.





The *Khasamaṭīkā*, a Sanskrit commentary by Ratnākaraśānti, on a Buddhist Tantra text entitled Khasama, is presented here for the first time. It is edited by Prof. Jagannath Upadhyaya from two manuscripts—one Palm leaf Ms. in old Nepali script Bhuñjimola and another paper Ms. in Devanāgarī—both discovered in Nepal. A translation of the commentary in Bhoṭa language of Tibet (Tanjore series) has also been utilised.

The *Kasamāṭīkā* is of manifold importance. The commentator not only explains the contents of the Tantra text but at the same time provides many other information about the text. He tells about the metrical composition of each verse of the text enumerating the *gaṇas* and the *mātrās* of each *pāda* of the verse. So much so he tells about the accent of the *svaras* used for linguistic expression (ह्रस्वत्वं पूरणार्थम्, ह्रस्वत्वमद्धं क्षेपु:) etc. the placement of the words in the verse (चकारो भिन्नक्रम:), grammar of the unfamiliar words in Sanskrit, (एदोतोर्युक्तवर्णयोश्च यथादर्शनम्) and not but least Sanskrit form of almost the full original Tantra text. Thus it is not difficult to restore the text from the commentary even if it is not discovered in original independently.

Ratnākaraśānti narrates these facts in brief in the beginning of his commentary with few more informations,

> इह द्वित्रिचतु:पञ्चषड्मात्रा: पञ्चधा गणा: ।
> प्रायेण द्विपदीवृत्तं पादस्त्रिचतुरैर्गणै: ॥
> अपभ्रंशस्तु भाषात्र विकार: संस्कृतस्य च ।
> पूरणं ह्रस्वदीर्घत्वविन्दुद्रुतविलम्बितै: ॥ (P. 232)

In the Bhoṭa translation of the commentary, these detaills are not found.

Ratnākaraśānti quotes some other Tantra texts viz 1) Srī-Guhya-samāja (pp. 233-246), 2) Srī-Paramādya (p. 234), 3) Sarvarahasyatantra (p-235), 4) Srīsamāja (p. 235), and 5) Vajraśikhara (P. 236). Further he says in clear words that this (Khasama-Tantra) is the uttaratantra of all the Tantras—*Sarvatantrāṇāmuttaratantramidam* (p. 235). He narrates the importance of the present Tantra in the following words,

*asmintantre sulabhā siddhiritikhyāpayituṃ dvipadi ṣatkamāha* (p. 253).

The commentator indicates more than once that he has before him more than one manuscripts of Khasamatantra with different readings. He says :—*jei iti kvacit pāṭhaḥ* (p. 242), *kvacit pustake mahatvasya stāne*

*svabhāvaśabdaḥ paṭhyate* (p. 236), *anye tu caturthapādaṃ na paṭhanti tripādikametad-iti ca-āhu* (p. 252).

Ratnākaraśānti's contribution is of special significance because he analyses the Śunyavāda Treatises in Vijñānavāda. His commentry of *Abhisamayālaṅkāra* and *Piṇḍārtha* are well known. His date is also almost decided. He florished during the regime of Caṇaka or Mahipāla of Pala dynasty at about 974 to 1026 or 978 to 1030 A.D.

In brief it can be said that the Kasama Tantra was composed in Apabhraṃśa and belong to the Tradition of Buddhist Siddhas. As the editor Prof. Jagannath Upadhyay is working on Tantras and promises in his brief preface to present a study, it is wise to await for critical edition of the original Kasamatantra and a masterpiece of study from the pen of a scholar well equipped with traditional learning and working with great enthusiasm.

At the end appears the 'Survey and bibliography of Higher Education and Research in Prakrits and Jainology in the Universities of India'. It elaborately furnishes the details in historical persceptive with latest developments. It can be fruitfully utilised by researchers in the field. Further it serves as guidelines for advancement of extensive and intensive research in Prakrits and Jainology. A supplement to it, and 'Research priority in Prakrits and Jainology' is also an urgent need.

The details furnished above introduce the Faculty Journal to a larger community of scholars all over the world particularly to whom our national language and Devanāgarī characters stands a bit difficult. It is hoped that this will also generate a spirit and create a good deal of interest in our national language and Devanāgarī characters for the study and clear understanding of the cultural heritage of this Nation from direct sources.

It is my duty to express on behalf of the Board of Editors and my own behalf, a sense of gratitude to our learned Vice-Chancellor Professor Gaurīnath Shastri who stands as an inspiration to high academic pursuit. This *Vidyātīrtha* is fortunate enough as most of the Vice-Chancellors at present, and the Principals at the stage of college, had been great academicians. The Journal was planned under the guidence of the outgoing Vice-Chancellor Professor Badarinath Shukla who showed his special interest in it. It is facinating that it is released during the silver jubilee of the University, under the patronage of present Vice-Chancellor who himself is





a scholar of repute. His '*Śubhāsaṃsa*' (printed at the begining) expresses his extreme interest in intensive research and stands as an inspiration to every earnest researcher.

Saṅkāya-Patrikā is one of the achievements of the co-ordinated efforts of the Faculty members and colleagues in other Universities. The words of thanks cannot be better than to say that 'we wish this spirit to be continued'.

The co-operation of the publication Department of the University always makes our task easier because of the academic interest of the officers. Our sincere thanks are due to them. Suggestions, comments and criticism are the assets of a sincere researcher, and we will welcome it. Like our other adventurous experiments if the Faculty Journal results in success, it will generate some new spirit.

**—Gokul Chandra Jain**

खसमतन्त्रस्य

आचार्यरत्नाकरशान्तिविरचिता

# खसमा-नामटीका

सम्पादकः

**प्रो. जगन्नाथ उपाध्यायः**

पालि एवं थेरवादविभागः

श्रमणविद्यासंकायः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

# प्राक्कथन

खसमा टीका[1] के रचयिता आचार्य रत्नाकर शान्ति हैं। रत्नाकर शान्ति, शान्तिपा या शान्ति नाम से भी प्रसिद्ध हैं। खसमतन्त्र[2] की यह बहुत सारगर्भित एवं महत्त्वपूर्ण टीका है, जिसका संस्कृत रूप मुझे नेपाल राष्ट्रीय अभिलेखालय में मिला था। इसके पूर्व यह ग्रन्थ सर्वथा अनुपलब्ध था। जहाँ तक मैं खोज सका, इस टीका का मूल ग्रन्थ खसमतन्त्र अभी भी संस्कृत में अनुपलब्ध है। खसमतन्त्र का मूल संस्कृत रूप न मिलने पर भी उसका भोट भाषा का अनुवाद उपलब्ध है[3]। टीका का भी भोटानुवाद उपलब्ध है।

आगे चलकर के मूल मिलने पर खसमतन्त्र का संस्कृत रूप प्राप्त होगा या अपभ्रंश अथवा अंशतः दोनों में, इसका अन्तिम रूप से निर्णय करना अभी कठिन है, क्योंकि मात्र इदानीं उपलब्ध भोट अनुवाद से यह निर्णय लेना कि इसका मूल संस्कृत में था या अन्य भाषा में एक कठिन कार्य है। इस स्थिति पर खसमा टीका से कुछ प्रकाश अवश्य पड़ता है। इस टीका ग्रन्थ में अपभ्रंश के ऐसे प्रतीकों को भी ग्रहण कर उनका व्याख्यान किया गया है, जिनका सन्निवेश ग्रन्थ में होना ही चाहिए। किन्तु इसके साथ ही इस संस्कृत टीका का जब उसके भोटानुवाद से पाठ मिलाया गया, तो उसमें उन अंशों का भोट-अनुवाद नहीं मिलता, जहाँ अपभ्रंश दोहों के चरण, पाद, अक्षर आदि का परिगणन किया गया है, अथवा अपभ्रंश शब्दों की अपभ्रंश व्याकरण के आधार पर व्युत्पत्ति दी गयी है। इसके आधार पर यह निर्णय लेना भी उचित नहीं होगा कि भोटानुवादक ने मूल ग्रन्थ में स्थित अपभ्रंश अंश का अनुवाद ही नहीं किया अथवा जिस प्रति का उसने अनुवाद किया, उसका मूल एकमात्र संस्कृत में या अपभ्रंश में नहीं था। क्योंकि इसके विपरीत टीकाकार ने अपभ्रंश के प्रतीकों को ग्रहण कर विषय को किंचित् मात्र नहीं छोड़ा है। यह कल्पना बहुत ही क्लिष्ट होगी कि मूल ग्रंथ दोहों में था, उसका संस्कृत छायानुवाद किया गया और पुनः उस छायानुवाद का भोट भाषा में अनुवाद हुआ।

---

1. Tohoku Catalogue No. 1424, Peking Ed. Vol. 51, No. 2141, P. 142-4-5.
2. Tohoku Catalogue No. 386, Peking Ed. Vol. 3, No. 80, P. 173-102.
3. Hajime Nakamura के Indian Buddhism पृष्ठ 341 की सूचनानुसार खसमतन्त्र का संस्कृत एवं भोट भाषा दोनों में सम्पादन G. Tucci ने Festschrift weller 762. F. में किया है। परन्तु यह अभी मेरे देखने में नहीं आया।

**आचार्य रत्नाकर शान्तिपाद का कार्यकाल प्रायः निश्चित है। यह पाल काल में चणक या महीपाल के राज्य में ९७४ से १०२६ ई० के बीच अथवा ९७८ से १०३० के बीच विद्यमान थे। इनके समकालीन आचार्यों में मुख्यरूप से जितारि, दीपङ्कर श्रीज्ञान, अवधूतीपा, अभयाकर गुप्त, प्रज्ञाकरमति, अद्वयवज्र, नारोपा आदि के नाम उल्लेखनीय हैं।**

ब्राह्मण कुल में इनका जन्म हुआ। मगध के उडन्तपुरी (वर्तमान विहार शरीफ) में इनकी जन्मभूमि थी। इनकी प्रारम्भिक दीक्षा सर्वास्तिवादी सम्प्रदाय में हुई। विक्रमशिल में जितारि (प्रायः ९८० ई०) और नारोपा इनके गुरु थे। उनसे इन्होंने अनेक शास्त्र पढ़े। शास्त्रीय विद्वत्ता के अतिरिक्त इन्होंने योग तन्त्र के क्षेत्र में भी अद्भुत प्रवीणता प्राप्त की। इसके लिए मालवा प्रदेश में जाकर इन्होंने ७ वर्षों तक कठिन योगाभ्यास भी किया। मालवा से विक्रमशिल लौटने पर सिंहल देश के राजदूत ने धर्म प्रचार के लिए इन्हें श्रीलंका निमन्त्रित किया। उसके आग्रह को स्वीकार कर इन्होंने छः वर्षों तक सिंहल द्वीप में धर्मप्रचार का कार्य किया। तारानाथ के अनुसार सिंहल जाते समय रामेश्वरम के समीप एक विशिष्ट यात्री को शिष्य बनाया, जो आगे चलकर सिद्धों में कुठालिपा का कुदालिपा नाम से प्रसिद्ध हुए। सिंहल से लौटने पर महाराज महीपाल की प्रार्थना पर विक्रमशील विश्वविद्यालय के पूर्वद्वार के पण्डित पद पर प्रतिष्ठित हुए। तिब्बती परम्परा के अनुसार बाद में आचार्य ने इस विश्वविद्यालय के अध्यक्ष पद को भी अलंकृत किया। तारानाथ के अनुसार प्रारम्भ में यह सुप्रसिद्ध सोमपुरी विहार के स्थविर-अध्यक्ष भी रह चुके थे।

आचार्य रत्नाकरशान्ति दर्शन के साथ योग एवं तन्त्र क्षेत्रों के भी प्रकाण्ड पण्डित थे। राहुल सांकृत्यायन के अनुसार इनके दर्शन ग्रन्थों की संख्या ९ है और तन्त्र पर २३ ग्रन्थ मिलते हैं। विनयतोष भट्टाचार्य ने साधन माला की अपनी भूमिका में इनके १८ तन्त्र ग्रन्थों के नामों का उल्लेख किया है। इनकी विद्वत्ता की ख्याति न्याय और व्याकरण के क्षेत्र में भी थी। छोजुङ् में तिब्बती विद्वान् पद्माकरपो ने इन्हें व्याकरण और न्याय का महान् पण्डित स्वीकार किया है।

रत्नाकरशान्ति विज्ञानवादी थे और उसमें भी निराकार विज्ञानवाद के पक्षधर थे। महापण्डित राहुल सांकृत्यायन को तिब्बत से प्राप्त हस्तलिखित ग्रन्थ-समूह में अद्वयवज्र की एक जीवनी से सम्बन्धित दो विच्छिन्न पत्र प्राप्त हुए थे, जिन्हें उन्होंने अपने दोहाकोश के परिशिष्ट में प्रकाशित कर दिया है।[४] उससे ज्ञात होता है कि अद्वयवज्र ने रत्नाकर शान्ति के पास रहकर एक वर्ष तक विज्ञानवाद की निराकारवादी व्यवस्था का अध्ययन किया था। इसका समर्थन रत्नाकरशान्ति के वज्रतारासाधन[५] से भी होता है।

४. परिशिष्ट सं० ६ पृष्ठ ४६९, दोहा कोश— सं० महापण्डित राहुल सांकृत्यायन, विहार राष्ट्रभाषा परिषद्, पटना—१९५७.

५. साधनमाला—सं० विनयतोष भट्टाचार्य. G.O.S. No-26. भाग–१. साधन सं० ११०, पृ० २२४.





गगनोपम अद्वय-विज्ञप्ति के साक्षात्कार की स्थिति को स्पष्ट करते हुए आचार्य ने जो विशेषण दिए हैं, वे हैं—"भ्रान्तिसमारोपितं भ्रान्तिचिह्नं सर्वधर्माणामाकारमपहाय तेषां प्रकृतिमेव केवलां अद्वयविज्ञप्तिलक्षणां शुद्धस्फटिकसंकाशां शरदमलमध्याह्न-गगनोपमां अनन्तां पश्येत् ।" इस प्रकार आचार्य ने ज्ञान में प्रतिभासित होने वाले आकार को मिथ्या स्वीकार किया है। इस दृष्टि से चर्यागीतिकोष[६] में उद्धृत इनके दोहों का अभिप्राय भी मिथ्याकारवाद के साथ अधिक संगत होता है। इनके दार्शनिक गुरु आचार्य जितारिपाद सुप्रसिद्ध निराकारवादी थे।

प्राचीन आचार्यों में रत्नाकर शान्ति का इस अर्थ में विशेष महत्त्व स्वीकार किया जाता है कि इन्होंने ऐसे ग्रन्थों की विज्ञानवादी व्याख्या की, जिन्हें सामान्यतः शून्यवादी धारा का माना जाता है। ऐसे ग्रन्थों में अभिसमयालंकार की उनकी टीका और पिण्डार्थ सुप्रसिद्ध हैं। जिसका मूल संस्कृत में नहीं, भोटानुवाद मात्र उपलब्ध है। इस खसमा टीका को भी आचार्य ने विज्ञानवाद, तत्रापि निराकारवाद के अनुकूल ही लिखा है। इनके सम्पूर्ण पक्षों पर अलग से एक विवेचन प्रस्तुत किया जा रहा है, जो संकाय पत्रिका के अगले अंक में प्रकाशित किया जाएगा।

भोट सम्बन्धी कार्य में मेरे छात्र पण्डित श्री जितासेन नेगी तथा श्री बनारसीलाल ने सहायता की है। उन दोनों के लिये स्नेह-प्रकाश करने में मुझे हार्दिक संतोष मिलता है।

**—जगन्नाथ उपाध्याय**

६. चर्यागीति कोष—सं प्रबोधचन्द्र बागची एवं शान्ति भिक्षु शास्त्री विश्व-भारती, शान्तिनिकेतन 1956, च० गी० नं० १५ पृ० ५१, च० गी० नं० २६ पृ० ८६.

## संकेत-सूची

| | |
|---|---|
| भो० | भोटभाषानुवाद |
| क. | पाण्डुलिपि की प्रति रील नं० A 142/99 (देवनागरी) (नेपाल राष्ट्रीय अभिलेखालय) |
| ख. | पाण्डुलिपि की प्रति रील नं० B 25/8 (भुज्जिमोल-नेवारी) (नेपाल राष्ट्रीय अभिलेखालय) |
| B.S.T. | Buddhist Sanskrit Text. (Mithila Institute Darbhanga) |
| G.O.S. | Gaekward's Oriental Series. |





### आचार्यरत्नाकरशान्तिविरचिता

# खसमा-नामटीका

॥ ॐ नमो वागीश्वराय[1] ॥

**कायैस्त्रिभिरपि खसमं परमाद्यं प्रणमता तदर्थस्य ।**
**तन्त्रस्य मया क्रियते टीका खसमस्य खसमैव ॥**

इह वज्रधरो भगवान् सर्वबुद्धानां बोधिः । सा चाश्रयपरावृत्तिलक्षणा । आश्रयः शरीरं स तेषां[2] त्रिविधः । तत्र चित्तसन्तानलक्षणस्याश्रयस्य यावत् सांक्लेशिकधर्मबीजानां तद्वासनानां दौष्ठुल्याख्यानामाधारस्तावदालयाख्यस्य पश्चादार्यमार्गेण निष्प्रपञ्चेन चिरभावितेन तासां परिक्षयादनालयाख्यस्य सतः प्रतिष्ठा देहभोगनिर्भासानां विज्ञप्तीनामितरेषां च सांक्लेशिकानां धर्माणामुत्पन्नामस्तंगमादनुत्पन्नानां चात्यन्तमनुत्पादात्तेनात्मना निवृत्तिनियमः । विशुद्धगगनोपमेन तु निष्प्रपञ्चेन प्रकाशात्मनाऽनन्तेन [3]प्रवृत्तिनियमः परावृत्तिः । सा बुद्धानां दौष्ठुल्याश्रयपरावृत्तिः । सैव तेषामनास्रवो धातुरुच्यते, अनाश्रवाणां बुद्धधर्माणां बीजाधारत्वात्[4] । सोऽपि मार्गस्तेषामाश्रयः । तस्य परावृत्तिर्लौकिकेन रूपेणात्यन्तिकी निवृत्तिः, लोकोत्तरेण चात्यन्तिकेन प्रवृत्तिः । सर्वधर्मतथतापि तेषामाश्रयः । तस्य परावृत्तिरागन्तुकसर्वावरणविशुद्धिरात्यन्तिकी । येयं बुद्धानां दौष्ठुल्याश्रयस्य मार्गाश्रयस्य तथताश्रयस्य च परावृत्तिः सैव तेषां बोधिः, सैव धर्मकायः । बुद्धधर्माणां काय आश्रय[5] इति कृत्वा स्वाभाविकः काय इत्यप्युच्यते[6], तथताप्रकाशयोः स्वरूपेऽत्यन्तमवस्थानात् । तदयं बुद्धबोधिलक्षणो भगवान् वज्रधरः प्रकृत्या खसमः । प्रकृतिरस्य स्वाभाविकः कायः, तेन खसम एव, निराभासानन्तसुविशुद्धप्रकाशानां तथतास्वभावत्वात् । सांभोगिकेन यद्यप्याकारवैचित्र्याद्यथाकारं नैव खसमः, तथापि यथाप्रतिभासं खसम एव । धर्मकायो हि खसमेन

---

१. भो० भगवान् श्रीवज्रसत्त्वाय । २. भो० 'तेषां' नास्ति । 'स च'···· अस्ति ।
३. भो० 'प्रवृत्ति' नास्ति । ४. भो० SA-BON-HZIN-PAHI PHYIR-RO.
५. भो० SKUHI RTEN. ६. क. इत्युच्यते ।

तत्त्वेन धर्माननावृतोऽनुभवति[1] संभोगकायस्तथैव परिच्छिनत्ति, अनुभवस्य निष्पन्दत्वात्[2]। कथं च तथा परिच्छिनत्ति? ग्राह्यग्राहकतत्प्रतिभासानामसत्तया परिच्छेदात्। तद्यथा बालानां घटाद्यनुभवनिष्पन्दो निश्चयः सत्तया। यथा च बालानां घटाकारः पटीयाननुभवः [3]सत्ताजल्पनमन्तरेणापि सत्तयैव परिच्छिनत्ति प्राक्तननिश्चयाभ्यास[4]-वासनाबलात्; तथा बुद्धानामकल्पकोऽपि[5] संभोगकायः स्वमाकारमसत्तयैव परिच्छिनत्ति। स एव परिच्छेदः प्रतिभासशब्देनात्र विवक्षितः। द्विविधो हि प्रतिभासः – संवेदनमुपलक्षणं च। तस्मात् संभोगकायोऽपि बुद्धानां यथाप्रतिभासं खसम एव। निर्माणकायस्तु सुतरां खसमः मायाकारैरपि स्वयं निर्मितस्य पुरुषादेरसत्तयैव परिच्छेदात्। स च वज्रधरो जनकः सर्वबुद्धानाम्। तेऽपि खसमास्तन्निष्पन्दत्वादिति सिद्धान्तः।

एतस्मिन् सिद्धान्ते चोद्यम्। नैव वज्रधरो बुद्धानां जनकः। किं तर्हि? बुद्धपुत्रः। पञ्चबुद्धमुकुटत्वात्। तस्य तेषां देवीचक्रस्य च कायवाक्चित्तयोगात् प्रपञ्च एवायं प्रपञ्चनयप्रवर्त्तकश्च। नैव खसमो नापि खसमनयप्रवर्त्तक इति। एतच्चोद्यं परिहर्त्तुमाह–**पञ्चबुद्धे**त्यादि। [अत्र श्लोकौ—

**इह द्वित्रिचतुःपञ्चषड्मात्रः पञ्चधा गणः।**
**प्रायेण द्विपदीवृत्तं पादस्त्रिचतुरैर्गणैः॥**
**अपभ्रंशस्तु भाषात्र विकारः संस्कृतस्य च।**
**पूरणं ह्रस्वदीर्घत्वविन्दुद्रुतविलम्बितैः॥**

द्विपदीखण्डं वस्तुकमिति पर्यायः। तत्र प्रथमायां द्विपदिकायां त्रिगणाः पादाः। अयुक्षादय[6] आद्यो गणः षण्मात्रः, द्वितीयो द्विमात्रः, शेषाश्चतुर्मात्राः। च शब्दोऽलुप्तचकारो भिन्नक्रमः। हो शब्दौ द्वौ। एको उस[7] आदेशः। द्वितीयः खलु शब्दार्थ (:) मव्ययं (:) संबोधनार्थं वा। होशब्दयोरोकारस्य ह्रस्वत्वं पूरणार्थम्। तथाहि अपभ्रंशे ह्रस्वत्वमद्धक्षेप एदोतोर्युक्तवर्णयोश्च यथादर्शनम्। **जइ के वि जइ को वि। जइ पि उ** इत्यादिवत्। तत्रैवं सम्बन्धः पञ्चबुद्धा मुकुटाश्रया यस्य त्रिभुवनं च सारः, अथवा स्त्री[8]

१. भो० CHOS-DE SGRIB-PA, MED PA क. त्तो।
२. भो० ÑAMAS SŪ-MYOṄ BA DAṄ RGYU MTHUN PAHI PHYIR-RO. ३. भो० 'सत्ता' नास्ति। ४. भो० 'अभ्यास' नास्ति।
५. क. कल्पोऽपि। ६. ख. अयुक्षादयोराद्यो। ७. ख. ड्डु। ८. क. त्रि।





भुवनं च सारः। आदिबुद्धकृतभावस्य तस्य खलु खसमप्रचार इति।][1] मुकुटाश्रया इति [2]मुकुटस्थाः, यस्येति वज्रसत्वस्य। त्रीणि कायवाक्चित्तगुह्यानि योगिनां[3] मण्डलसंगृहीतानि त्रिभुवनम् अथवा स्त्रीति योगिन्यस्तासां भुवनं मण्डलं स्त्रीभुवनं[4] तच्च यस्य सारो विभवः, वज्रनयत्वात्। यथोक्तं श्रीगुह्यसमाजे—

**मोहे द्वेषे च रागे च सदा वज्रे रतिः स्थिता।**
**उपायः सर्वबुद्धानां वज्रयानमिति स्मृतम्**[5]॥ [गु. स. १८.५१]

षण्णां चक्रवर्तिनामाद्यत्वाद् आदिबुद्धो वज्रसत्वः। चक्रवर्तित्वादेव समुकुटः समण्डलश्च स कृतः कृतकः सांवृतो भावोऽस्येति तथोक्तः। इत्थंभूतस्य सतः तस्य योऽयं प्रचारो व्यवहारः संवृतिः स्वकायवाक्चित्तमुकुटबुद्धादिः स सर्वस्तस्य खसमः खसमत्वेन प्रतिभासात्। कथम्? आकाराणामसत्तया परिच्छेदात्। तस्मादयं भगवान् स्वयं च खसमः, खसमस्य च वज्रनयस्य प्रवर्तकः। स्वमुकुटबुद्धसंवृतिरपि[6] तेनैव कृता। किं पुनः? स्फुरणबुद्धाः[7]। तस्मात् जनक एवासौ बुद्धानाम्।

ननु बुद्धपुत्रोऽप्यसावुच्यते। तत्कथम्? कदाचिद् बोधिसत्त्वरूपत्वात्, बोधिसत्वानां बुद्धसुतत्वात्। ननु मन्त्रनीतौ भगवतः कायवाक्चित्तानि मण्डलं च[8] भाव्यते। ततो निराभासस्य धर्मकायस्य नैव प्राप्तिः। तदप्राप्तौ तदाश्रितयोः संभोगनिर्माणकाययोः सुतरामप्राप्तिः। अथान्यथैव तस्य भावना सा तर्हि कथ्यतामित्याह—[**जइ** इत्यादि। अत्र गणाश्चतुर्मात्रा एव अयुक्षाद्यश्चत्वारः[9]। युक्षादयस्त्रयः[10]। ए ऐ इति द्वावप्येकारौ ह्रस्वौ अल्पको विन्दुः। आद्येन भावेन चित्तं निरूप्यते। एष परमार्थस्य भावः बुद्धस्वभावः खलु नैव दृश्यते, नापि त्रिज्ञानस्वभावः[11]।] एतेनेति उत्तरार्धेन[12]

१. 'अत्र श्लोकौ' 'इत्यतः' 'प्रचार इति' यावद् भोटग्रन्थे नास्ति।
२. ख. म। ३. भो० RNAL-HBYOR-MA.
४. भो०—त्रिभुवनम्।
५. मोहो द्वेषस्तथा रागः सदा वज्रे रतिः स्थिता।
उपायस्तेन बुद्धानां वज्रयानमिति स्मृतम्॥ B. S. T. No. 9.
६. भो० ṄID—KYIS-SAṄS-RGYAS-RNAMS-KYI-DBU-RGYAN-DAṄ KUN-RZOB-KYIS.
७. भो० SANS-RGYAS-RNAMS-SPROS-PAS-SO.
८. भो०....DAṄ-THUGS-KYI-DKYIL-ḤKHOK.
९. ख यो। १०. ख. यो।
११. भोटग्रन्थे जइ इत्यादितः विज्ञानस्वभावपर्यन्तं नास्ति। १२. क. र्धे।

वक्तव्येन भावनेति प्रकारेण चित्तं योगिनो निरूप्यते समाधीयते। एषा परमार्थस्य [1]वज्रसत्वस्य भावना, नातोऽन्या। कतमेन भावेनेत्याह—**बुद्धेत्यादि**[2]। बुद्धश्चित्तबाह्यश्चित्तग्राह्यः[3] स स्वभावोऽस्येति। बुद्धस्वभावः[4] खलु नैव संदृश्यते नोपलभ्यते न कल्प्यते, नापि विज्ञानस्य स्वभावभूत आकारः, एकानेकविचारासहत्वात्। तथाहि ग्राह्यग्राहकानुपलम्भो द्वयानुपलम्भरूपस्य धर्मकायस्य प्राप्तिहेतुः। कायवाक्चित्तभावना तु संभोगकाययोः, तस्मादेषैव तस्य भावना क्षिप्रतरं कायत्रयस्य प्रापणादिति।

भवतु वज्रधरस्यैवं भावना, बुद्धादीनां तु कथं भावेनेत्यत आह—**बुद्ध स** इत्यादि। [अत्र प्रतिपादं चत्वारो गणाः आद्ये पादे प्रथमौ द्वित्रिमात्रौ युक्षादयः। प्रथमः षण्मात्रः, द्वितीयो द्विमात्र शेषाश्चतुर्मात्रा।][5] बुद्धस्य वज्रधरस्य रत्नकेतोः सह पद्मेन वृत्तस्य एतेषां देवानां नास्ति स्वभावः। आदिबुद्ध आकाशस्वभावः, बुद्धस्येति वैरोचनस्य वज्रधरस्येत्यक्षोभ्यस्य रत्नकेतोरिति रत्नसम्भवस्य पद्मेनेति अभिताभेन वृत्तस्येति कर्मणः अमोघसिद्धेरित्यर्थः। एतेषामिति पञ्चानां तथागतानां देवानामिति देवीनां कुलानां च नास्ति स्वभाव इति ग्राह्यो ग्राहकश्च द्वयप्रतिभासस्यालीकत्वात्। यदि द्वयमलीकं किं तर्ह्येषां निजं रूपम्? आदिबुद्ध इति वज्रधरः। आकाश इति खसमः धर्मकायलक्षणत्वात् खसमत्वेन प्रतिभासात्—स एषां स्वभावः।

निजरूपं तन्निष्पन्दत्वादेषामुपसंहर्तुमाह। [**आइ** इत्यादि[6]। अत्रापि प्रतिपादं चत्वारो गणाः प्रथमपादे प्रथमो षण्मात्रद्विमात्रौ एवं चतुर्थतृतीये प्रथमो द्विमात्रः शेषाश्चतुर्मात्राः। एव इति एषा उपज्ज इति पकारस्य द्विवचनं नेष्यते। खइं इति विलम्बितेन त्रिमात्रं, खशब्दात् स्वार्थे कः स्वरशेषता, तृतीयैकवचनस्य ईभावो अकारलोपश्च। आदिधर्मस्य एषा उत्पत्तिः सत्वा उत्पद्यन्ते खेन समानाः। बहुत्वेऽप्येकवचनं नये क्रियते, (तत्र) शास्त्रं प्रमाणम्। आदि शुद्धं पदं खसमसमानम्,] आदिधर्मो वज्रसत्वः धर्मकायात्मकत्वात्। तस्यैषा खसमैः कायवाक्चित्तैरुत्पत्तिः। अशेषावरणक्षयादभिव्यक्तिरेव तस्योत्पत्तिः प्रासाद[7]भङ्गादाकाशोत्पत्तिवत्। आकाशमस्योत्पत्तौ चिह्नदृष्टान्तः। तथा चोक्तं श्रीपरमाद्ये—

१. भोटे नास्ति वज्र-शब्दः। २-३-४. भो० ŚES-BYA.
५. भो० ग्रन्थे अत्र प्रतिपादं इत्यतः चतुर्मात्रा पर्यन्तं नास्ति।
६. आइ इत्यादितः खसमसमानम् इत्यन्तं भोटे नास्ति। ७. ख. दाद।





**आकाशोत्पादचिह्नत्वादनादिनिधनः परः।**
**सर्ववज्रमयः सत्वो वज्रसत्वः परं सुखमिति ॥**

अतएव सत्वा बुद्धादय उत्पद्यन्ते, आकाराणामसत्तया परिच्छेदात्। खेन समानाः।

ननु योगतन्त्रेषु महामुद्रासिद्धिरेव बोधिस्तस्याः खसमं ज्ञानं हेतुरेव न स्वभावः। तस्मात् सर्वयोगतन्त्रैः खसमतन्त्रस्य विरोध इति चेदाह—**नय** इत्यादि नीयते व्याख्यायतेऽनेनेति नयः। येन भवगता नेयार्थसूत्रान्तो व्याख्यायते स नयः। तस्मिन्नर्थेऽनक्षरारूढेऽपि शास्त्रं भगवतः शासनं प्रमाणं क्रियते, न तद्विपरीते।

अथ मन्त्रमुद्रादौ साकारे ज्ञाने कीदृशो नय? इत्याह—**आदीत्यादि**। आदिशुद्धमादिशुद्धिर्धर्मकायः। तदेव पदमालम्बनं खसमज्ञानसमानां (नं) खसमनिष्पन्दानां मन्त्रमुद्रादीनां खसमत्वेन तेषां प्रतिभासात्। अतएव सर्वतन्त्राणामुत्तरतन्त्रमिदम्। श्रीसर्वरहस्यतन्त्रेप्युक्तम्[1]—

**न किञ्चिद्धेतुतत्त्वं हि फलतत्वं तथैव च।**
**तत्त्वं तथताज्ञानं तत्र योगी समाचरेत् ॥** इति।

हेतुतत्त्वं चित्तप्रतिबेधाश्चत्वार आकाराः। फलतत्त्वं पञ्चम आकारः, तदुभयमप्याकारकमसत्, तथताज्ञानमेव तयोस्तत्त्वं स्वाकाराणामसत्तया परिच्छेदात्। तत्र परिच्छेदे योगी चरेदित्यर्थः। श्रीसमाजेऽप्युक्तम्—

**कायाक्षरमनुत्पन्नं वाक्चित्तमनलक्षणम्।**
**खवज्रकल्पनाभूतं मिथ्यासंग्रहसंग्रहम् ॥ इति**
[गु० स० १७.३६]

न क्षरतीत्यक्षरं गुह्यं कायगुह्यं वाग्गुह्यं चित्तगुह्यं तत्सर्वमनुत्पन्नमस्वभावं च प्रतिभासते। यथाकारमसत्तया परिच्छेदात्, खवज्रे धर्मकाये धर्मद्रवानुभूते कल्पनाभूतं परिच्छेदात्मकं खसमेन तत्त्वेन सत्तया यथाकारमसत्तया च परिच्छेदात्। मिथ्या च तत् साकारत्वात्, संग्रहश्च तत्सम्यक् परिच्छेदात्, तेन संग्रहोऽस्येति तथोक्तम्, शुद्धलौकिकज्ञानसंगृ[2]हीतमित्यर्थः। एवं तावत् सर्वयोगतन्त्रसाधारणी खसमार्थभावनोक्ता।

१. Peking, Ed. Vol. 5, No. 114, Tohoku Catalogue No. 481.
२. क. संग्रहीतं नास्ति।

इदानीं श्रीसमाजादितन्त्रैरेत्र साधारणीं खसमार्थभावनां प्रस्तोतुमाह—**पञ्चे-**त्यादि। [द्विपदीद्वयं आद्यया तुल्यगणं प्रथमश्चशब्दोऽप्यर्थः। द्वितीयोऽवधारणार्थो भिन्नक्रमश्च। पञ्चबुद्धमुकुटस्यापि यस्य धर्म एव स्वभावः। वज्रसत्वः प्रणम्यतां त्रिभुवनधर्मप्रभावः। वज्रसत्वः प्रणम्यतां][1] कीदृशः पञ्चबुद्धमुकुटस्यापि देहिनः सतो यस्य धर्मकाय एव स्वभावः? धर्मकायस्यैव खसमस्य समरसी(शत[2])भूतसर्वबुद्धधर्ममयस्य, तया मूर्त्या, तेन संदर्शनात्। पुनः कीदृशः? त्रिभुवनं योगिनीचक्रम्। धर्मप्रभावो धर्मदेशना, धर्मसंभोगलक्षणाऽस्येति तथोक्तः। उक्तं च वज्रशिखरे[3]—

**ततः स्वाभाविकान् कायान् संभोगैर्विसृतः पुनः। इति।**

अत्र भावनैव प्रमा णो[4] (नो) विवक्षितः। स्वकायवाक्चित्तैः तत्कायवाक्चित्तेषु प्रवेशः प्रणामः। प्रणामानुसंशमाह—**वज्रे**त्यादिना। वज्रसत्वे प्रणम्यमाने पुण्यमपि भवत्यनन्तम्। वज्रसत्वः प्रणम्यै[5]तांल्लभ्यते धर्ममहत्वं पुण्यमपीति। अपि शब्दाज्ज्ञानमपि। अनन्तमिति यावता संभूतसंभारः स्यात्। भूयोऽपि प्रणम्यतां यतः प्रणामाल्लभ्यते धर्ममहत्वं वज्रधरमाहात्म्यम्। क्वचित् पुस्तके महत्त्वस्य स्थाने स्वभावशब्दः पठ्यते। तत्र यमकानुपपत्तिः स दोषो व्यभिचारात्[6]।

धर्मकाय एव वज्रसत्त्वशरीरतां गच्छतीत्युक्तम्। तत्र धर्मकायोऽसाक्षात्कृतः, सङ्केतेन भावयितव्यः। तमाह—**सर्वे**त्यादिना। [इयमपि सैव द्विपदी किन्तु द्वाभ्यां पादाभ्यां सर्वसत्वान् परिभाव्य क्रियते मोक्षस्वभावः[7]।] सर्वसंबुद्धान् मायासुरतध्वनिभिराहूय तान् प्रवेश्य हृदि विलीय कमलोदरगतान् विभाव्य क्रियते मोक्षस्वभावः शरदिन्दुद्रवधवलः सर्वबुद्धधर्माणां समरसीभावो धर्मकायः।

ततः किं क्रियत इत्याह—**वज्रे**त्यादि। [अत्र चतुर्गणाश्चत्वारः पादाः। वज्रसत्वकृतसर्वस्वभावो मोक्षः क्रियते धर्मस्वभावः। एष च धर्मोऽविनष्टस्वभाव इति[8]।] कथं तर्हि देहीक्रियत इत्याह—**लोकेने**त्यादि। लोकेन हेतुना लोकार्थमित्यर्थः। क्रियते सन्दर्श्यतेऽन्यस्वभावो वज्रसत्त्वाकारः, यथासङ्केतं विनयैस्तत्परिणामतया प्रतीतेः।

१. द्विपदीद्वयं इत्यतः प्रणम्यतां पर्यन्तं भोटे नास्ति। २. क. ख. पुस्तके अस्ति।
३. ख. श्रीवज्रशिखरे, Peking Ed. Vol. 5, N. 113, Tohoku Catalogue N. 480. ४. ख. क. प्रमाणो। ५. ख. प्रणम्य तां।
६. भोटानुसारं व्यभिचारात् इति किन्तु क. ख. पुस्तके साप्यदोषो व्यभिचारादिति पाठः। ७. इयमपीत्यारभ्य स्वभाव इत्यन्तं भोटे नास्ति।
८. अत्रतः इति पर्यन्ते भोटे नास्ति।





**परमार्थतस्तु धर्मकायनिष्पन्दभूतं ज्ञानान्तरमेव तदाकारमुत्पद्य यथाकारमसत्तया भगवतः ख्यातिः। [ इत ऊर्ध्वं सैव द्विपदी त्रिगणैः पादैः। ए चउ देवीत्यतः प्राक् काअ इत्यादि। अत्र उत्पत्तिप्रकाराणां[1] ह्रस्वत्वं पूरणार्थम्। कायो वाक् तत्र चित्त भोधर्मस्याद्युत्पत्तिः। योगपीठं तत्र देवीचुन्दाधर्मस्योत्पत्तिः[2] ]** तस्मिन् वज्रसत्वोत्पादने का तस्योत्पत्तिः? किं चोत्पत्ति[3]स्थानमिति चेदाह—कायो वाक् चित्तमिति त्रयमिदं धर्मस्य वज्रसत्वस्याद्युत्पत्तिः। योगस्य पीठं प्रतिष्ठा भगवती चुन्दा महाकाया, तस्मिन् वज्रसत्वोत्पत्तिः। कौ तस्य मातापितरौ कथं चोत्पत्तिरित्याह—**वज्जहो** इत्यादि। [ वज्जहो इति विलम्बितेन षण्मात्रो गणः। वज्रस्य तत्र मन्त्री भावयत्येकस्वभावाम्[4]। धर्मरूपमालम्बते चिन्तयति वज्रस्वभावम्[5] ] वज्रस्येत्यक्षोभ्यस्य, तस्मिन् योगपीठे, एकस्वभावामिति स्वभावाः स्वाभविद्यासंयुक्तत्वात् एका चासौ स्वभावा च तां धर्मरूपमिति मोक्षं पूर्ववत्। वज्रस्वभावं वज्रसत्वदेहोत्पत्तिम्, तमेवाह—**जटे**त्यादिना। [ जटामुकुटेन च मण्डितं वर्णं च नीलस्वभावम्। वज्रसत्वसुसमाधिं भावयत्येष स भावः[6]।] जटामुकुटेन च पञ्चबुद्धविराजितेन मण्डितं भगवन्तम्, वर्णं च तस्य नीलम्। एवं वज्रसत्वस्य सम्यक्समाधिं भावयेत्। एष इति योगी सहभावेन सभावः सादर इत्यर्थः। अक्षोभ्यजटामुकुटं तु बाह्यैकरत्नचिन्हं न बुद्धचिह्नम्।

[7]अथाक्षोभ्यस्यापि किमिन्दुद्रवादुत्पत्तिः? नेत्याह **अक्क**[8] इत्यादि। [ अक्क[9] इति त्रिमात्रो गणः। मज्जट्ठिउ इति पञ्चमात्रः। अर्कमण्डलमध्यस्थितां चिन्तयत्यक्षरोत्पत्तिः। अक्षररूपं निर्वर्त्य चिन्तयति वज्रस्वभावम्[10]। ] अर्कः सूर्यः अक्षरं नीलहूँकारम्। वज्रसत्वबीजं तु सितहूँकारः। वज्रस्वभावमिति अक्षोभ्यमूर्त्तिम्।

वज्रसत्वोपत्तिरपि मन्त्रादेवेत्याह **जलतउ**[11] इत्यादि। [ अत्र प्रथमगणो द्रुतोच्चारणेन चतुर्मात्रः कर्तव्यः[12]।-] जलान्तजं भावयति मन्त्री [ आत्मनो रूपं[13] स्वभावम्। वज्रसत्वमालम्वते अद्वयरूपस्वभावम्[14]। ] जलमिन्दुद्रवः स एवाऽन्तः

१. ख. प्प। २. इत अध्वं इत्यतः उत्पतिः पर्यन्तं भोटे नास्ति।
३. क. का इति अधिकः। ४. क. वाः।
५. वज्जहो इत्यतः वजस्वभाव इति यावत् भोटे नास्ति।
६. जटामुकुटेन इत्यतः भाव इति यावत् भोटे नास्ति।
७. क. अथेति नास्ति। ८-९. क. क्ष।
१०. अक्ष इत्यतः स्वभावं यावत् भोटपुस्तके नास्ति। ११. भोटे जलान्तमित्यादि।
१२. भोटे अत्रतः कर्त्तव्यान्तं नास्ति। १३. ख. रूप।
१४ आत्मनो आरभ्य अद्वयरूपस्वभावं यावत् भोटे नास्ति।

तस्वानां पित्रोश्च, तस्माज्जातम्। आत्मनो रूपकं स्वभावं स्वदेवताबीजमित्यर्थः। तच्चन्द्रमण्डलमध्यस्थं[1] भावयति मन्त्री तेन बीजेन वज्रसत्वं भावयति। अद्वयमूर्ति-स्वभावम्। कथमद्वयमूर्तिः? नार्थो न ज्ञानमिति प्रतिभासात्, स्वविद्यासंयोगाद्वा।

योगमुपसंहरंस्तत्फलमाह—**एष** इत्यादि। [एषा चित्तनिष्पत्तिः कथिता वज्र-धरेण, यत्र तेन भावेन भावयति सिध्यति चित्तस्वभावः।] चित्तनिष्पत्तिः वज्रधर-चित्तयोगः। भावेनेति प्रकारेण भावयति वज्रसत्वम्, स सिध्यति वजधरचित्तस्वभावः।

यदि वज्रधरस्यापि मन्त्रादुत्पत्तिरप्रपञ्चसमाधौ स्थितस्य देहोत्पादनायोगात्, तर्त्हि तस्मात् समाधेरचोदितस्यास्य व्युत्थानम्। विक्षेप एव स्यादनायकधर्मो वेत्यत आह—**ए(अ)** इत्यादि। [अत्र प्रतिपादं चत्वारो गणाश्चतुर्मात्राः। एषा चतुर्देवो एक-स्वभावा गीतेन भावयति खेन सभावम्। एवं धर्मकृतचित्तस्वभावं भावयति देवीं मोक्ष-स्वभावां[3]] चतुर्विधां देवीं देवीचतुष्टयमित्यर्थः। एकस्वभावेति मोक्षरूपा, गीतेनेति वक्ष्यमाणेन चतुर्गीतकेन, भावोऽभिप्रायः। तद्वत्तं करोति भावयति मन्त्राकारस्याभि-प्रायस्योत्पादेन प्रबोधयतीत्यर्थः। कतमं प्रबोधयति? खेन सभावं समानभावं खसमं धर्मद्रवमित्यर्थः। [एअ शब्द एवमर्थः प्राकृतादानेतव्यः, प्राकृतस्याप्यपभ्रंशे प्रवेशात्। **जन्तो द्विअ अतन्तो द्विअ** इत्यादिवत्[4]।] एवं सति योगी धर्मद्रवं कृतचित्तस्वभावं कृतवज्रधरमूर्ति भावयति देवीमूर्ति च, मोक्षस्वभावां सुविशुद्धचित्तं(तो) वज्रसत्वः, सुविशुद्धा तथता देवीति भावः।

अनया भावनया बुद्धत्वं प्राप्यते[5] इत्यस्मिन्नर्थे आत्मानमुदाहरणीकर्त्तुं कश्चिद् बुद्धः[6] पर्षत्सन्निपतितोऽनुक्तमप्यर्थमाह—**वज्जसत्त** इत्यादि। [अनयोः पादाः त्रिगणाः पोठपकारस्य द्विर्वचनं, उत्पत्तिपकारस्य द्विर्वचनाभावः[7] उपत्तिहो इति द्रुतह्रस्वाभ्यां[8] चतुर्मात्रः।

वज्रमत्वो मया दृष्टो योगपीठे रममाणो दारां गृहीत्वा सकलसमां तिष्ठति वेषं धारयन्, खेन सभावाद्भावादुत्पत्तिः। खलु तत्र या (ो) दृष्टा (ो) वज्रसत्वोऽवगाहते स्फारयति बुद्धान्निविष्टः[9]।] दारामिति भार्यां सकलसमामिति भगवतः सर्वसमां, यथा

१. ख. श्च। २. कोष्ठांशः भोटे नास्ति। ३. भोटे अत्रतः पर्यन्तं नास्ति।
४. कोष्ठांश भोटे नास्ति। ५. ख. प्ये। ६. क. धः।
७. क. व। ८. ख. स्वाश्च।
९. भोटे अनयोः इत्यतः निविष्टपर्यन्तं नास्ति।





हि भगवान्नोलः पञ्चबुद्धालङ्कृतजटामुकुटी दक्षिणेन विश्ववज्रधरो वामेन विश्ववज्रा-ङ्कितघण्टाधरः तथैषापि भगवती तिष्ठतीति। य इति शेषः वेषप्रसाधनं[1] सभावादिति समानभावात्। भावादिति सर्वसत्वानां तत्वाद् धर्मद्रवादित्यर्थः। अवगाहत इति परिच्छिनत्ति, तामिति शेषः।

कथमित्याह—**स्फारयतीत्यादि**। निविष्टो मनसा समाहित इत्यर्थः। **वज्र**[2] इत्यादि [अत्रायुक्यादौ त्रिगणौ, युक्यादौ द्विगणौ, ज्जशब्दः ख च शब्दार्थः। चतुः स्वभावश्चतुर्देवीमध्यनिविष्टः, त्रिभुवनं मायास्वभावेन प्रविष्टः[3]।] सर्वबुद्धानां प्रत्येकम-नन्ताः[4] कायवाक्चित्तप्रभेदास्तत्कर्मभेदाश्च। संक्षिप्य चत्वारि गुह्यानि क्रियन्ते—कायगुह्यं चित्तगुह्यं वाग्गुह्यं कर्मगुह्यं च। तेषां तथता यथाक्रमं चतस्रो देव्यः। तस्मात् चतुःस्वभावा।[5] अतएव सितनीलरक्तहरिताः दक्षिणेन सवर्णवज्रधराः वामेन चक्ररक्तोत्पलकमलनोलोत्पलधराः स्वकुलतथागतालङ्कृतरत्नमुकुटाः, तासां मध्ये निविष्टो वज्रपर्यङ्केण तासामेव मायोपमत्वेन प्रतिभासात्। ताभिः संगृहीतं त्रिभुवनं तथागतगुह्यत्रयं मायोपमत्वेन प्रविष्टोऽवगाढः परिच्छिन्दानः। [इत ऊर्ध्वं तिस्रो द्विपदिकाः प्रतिपादं चतुर्गणाः। तृतीया तु द्वाभ्यां पादाभ्याम्। **विस्सवज्ज** इत्यादि[6]।] विश्ववज्रं तत्र चतुर्मुखं देवस्य वज्रधरस्य, तत्रेति हृच्चन्द्रे, बुद्धा अपि सर्वं विकुर्वणमेतस्य अतएव तेषां स्फारणात्[7]। स्फारद्बुद्धानामुपयोगमाह[8]— यथा यथा उत्पद्यन्ते। देव इति देवभूताः। हो इत्यामन्त्रणं।[9] बुद्धानां सर्वो विकुर्वणलाभः खलु स इति शेषः।

भवतु विश्ववज्रस्य बुद्धानां च विकुर्वितम्, किं वज्रसत्वस्येत्यत आह—[**सब्बउ** इत्यादि। सर्वेषां देवानामिति बुद्धादीनां आम उम्भावः। जयन्ती इत या उत्पत्तिः। **वज्जसत्तहो** इति ङ[10]सो हो भावः[11]।] **तेन्तति**-तत्सर्वमित्यर्थः। सर्वं तद्वज्रसत्वस्यैव विकुर्वणमिति यावत्, वज्रसत्वस्यैव तेन तेनाकारेण प्रसवादिति भावः। [अतश्च **दीसइ सब्बहो धर्म(म्म)सहाव। तिहुअण सब्बहो एषु(स)सहाव**॥ दृश्यते[12]] सर्वस्य विश्ववज्रादेर्धर्म एव। अद्वयज्ञानमेव स्वभावो नार्थो न ज्ञानमिति परिच्छेदात्। अतएव त्रिभुवनं योगिनीचक्रं विश्वं वा सर्वं समग्रमेकस्वभावमेव दृश्यत इति वर्तते। **कीड** इत्यादि क्रीडांकुर्वन्(ता)बुद्धेन मया दृष्टस्तद्योगैश्वर्यञ्च सर्वा (वं) दृष्टाः (ष्टम्)। **देवे-**

१. ख. ष्ट (?)। २. ख. व उ (?)। ३. कोष्ठांशः भोटे नास्ति।
४. भोटे अनन्ताः नास्ति। ५. भोटे भावात्। ६. कोष्ठांशः भोटे नास्ति।
७-८. स्फ। ९. ख. णो। १०. ख. उमहो। ११,१२. कोष्ठांशः भोटे नास्ति।

त्यादि । देवो वज्रसत्वादयः तेषां समयस्तत्त्वं तद् द्योतकः पटलः । [आदिमउं इति आदिमः प्रथमः स्वार्थे कः तस्य पाक्षिक उंभावः । आइमउं[1] एवं विदिज्जउं तइज्जउं **चतुत्थउं पञ्चमउं**[2] । ]

**खसमायां खसमतन्त्रस्य प्रथमः पटलः ॥**

**क्वचित् प्रदेशे देवी पठ्यते क्वचिच्चतुर्देव्यः** । अतः सन्देहनिवृत्तये देवीसंख्याश्चतस्रो देव्यः पृच्छन्ति **आइक्ख** इत्यादिना । [ अत्रायुजौ षण्मात्रौ युजौ दशमात्रौ, समयो मण्डलम्[3], ] आचक्षे देवी[4]नामिति सम्बन्धः । [ तव समयोत्तमे कति देव्यः ? सउत्तम इति[5]] हे सदोत्तम उत्तमा प्रधानदेवो सदा संयुक्ता[6]स्मिन्निति सदोत्तमः । सङ्गीतकार आह—**तहि** इत्यादि । [ इयं त्रिगणा, एकेन पादेन[7] ] तस्मिन् प्रदेशे चतुर्गीतक भाषते भगवान् । कुतः ? अत्रैव तासां नामनिर्देशात् । लोके च बहूनां प्रधानपूर्वकस्य क्रमनिर्देशस्य प्रतीतत्वात् । भादेव्याः प्राधान्यं शान्त्यादिदेवीनां च यथाक्रमं पूर्वादिदिग्दलेषु वृत्तिर्यथा गम्येत न संख्यामात्रम् । **सुण्णा इएअ** इत्यादि । एतानि चत्वारि गीतकानि यथाक्रमं चित्तवाक्कायगुह्यानां मायोपमत्वद्योतकानि । तेषामेव परिग्रहाय धर्मद्रवस्य प्रोत्साहकानि । प्रमिताक्षरा चात्र वृत्तम् । अस्याः प्रतिपादं चत्वारो गणाः चतुर्मात्राः । प्रथमतृतीयौ गुर्वन्तौ, द्वितीये मध्य एव गुरुः ।

**शून्याविवेककृतधर्मसमा भाशान्तिमोक्षा सुषमाऽसमाः ।**
**मायास्तु कार्ये बुद्धसमाः क्रीडन्ति सर्वे खसमा अस(श)माः ॥**

आकाराणामस्तंगमाच्छून्यश्चासौ तत एव भेदानुपलक्षणादविवेकश्चेति शून्याविवेकः । आकाशकरणन्यायेनोत्पादितत्वात् कृतसर्वबुद्धधर्मद्रवरूपत्वाद्धर्म एव त्रिभिः पादैः सम्बोध्य देवेभ्यश्चोदयन्ति । **समा** इति त्वयैव तुल्यास्तत्तथतात्मकत्वात् । कास्ता इत्याह—**भा** इत्यादि । पत्युरङ्कगतत्वान्नित्यं भासत इति भाः । चतुर्देवीसंग्रहरूपत्वाद्वा अत्यर्थं भासत इति भाः । सर्वकायोपद्रवशमनाच्**छान्तिः**, सर्वचित्तावरणमोक्षणात् **मोक्षा**, सर्वबुद्धधर्मरतिप्रायणात् सुषमा । अनन्तनिर्माणैर्जगदर्थकरणादसमा । एताः पञ्च देव्यो यदि समाः कथं तर्हि भादेव्यादिरूपेण विचित्रा इत्यत आह—**मायास्त्वि**ति । यद्यपि समास्तथापि माया इति तु शब्दार्थः । मन्त्राद्यधिष्ठानात् काष्ठादिकमसता गजादिरूपेण प्रथमानं माया, तत्साधर्म्याद्देव्योऽपि

१. क. जं । २. कोष्ठांशः भोटे नास्ति । ३. कोष्ठांशः भोटे नास्ति ।
४. क. वा । ५. कोष्ठांशः भोटे नास्ति । ६. ख. उत्तमोऽस्मीति अधिकः ।
७. कोष्ठांशः भोटे नास्ति ।





मायाः । धर्मकायनिष्पन्दे शुद्धलौकिके ज्ञाने तासामसता विचित्रकायवाक्चित्ताकारेण प्रख्यानात् । किं निमित्तं देव्यो माया इत्याह—**कार्यं निमित्तं जगदर्थहेतोः** । अतश्च **ता बुद्धसमाः बुद्धैः** वज्रसत्वादिभिः **समानाः** । तेऽपि हि **धर्मकायेन समास्तन्निष्पन्दशुद्धलौकिकज्ञानस्वभावे संभोगकाये विचित्ररूपाः प्रख्यान्ति** जगदर्थक्रियार्थम् । ततः किमित्याह—**क्रीडन्तीत्यादि** । सर्वे खसमा देव्यो बुद्धाश्च क्रीडन्ति, समेत्य विश्वार्थचर्यया रमन्ते । कियन्तं कालमित्याह—**अस(श)मा** इति । शमः शान्तिर्विनाशः तदभावाद(श)मा नित्यकायास्तथागता इति वचनात् । नित्या हि तथागतास्त्रिभिरपि कायैः स्वाभाविकेन प्रकृतिनित्यतयाऽनादिनिधनत्वात्, साम्भोगिकेनाशंसननित्यतया अनिधनत्वात्, नैर्माणिकेन प्रवन्धनित्यतया क्वचिद् विनाशेऽपि तदेवान्यत्रोत्पादात् अन्यत्र चावस्थानात्, महारण्यलग्नाग्निस्कन्धवत् । तदेवं धर्मसंभोगस्वभावस्य क्रीडाचित्तस्य परिग्रहाय प्रोत्साहना । जगदर्थसाधनत्वाद्विशुद्धत्वान्निरूपद्रवत्वाच्च नित्यतया अत्र ध्रुवकं षडक्षरो मन्त्रः । रुलुरुलुभ्योरुट् । मायेत्यादि ।

**मायास्वभावाःकृतद्योतसमाः[1] भासन्तेतुल्यरवधर्मसमा ।**
**धर्मा अक्रीडाः खसमानां समाः असमागमांशाः[2] स्वतो वीणासमाः ॥[3]**

खसमानामिति धर्मकायप्रकृतीनां बुद्धानां देवीनां च । धर्मा इति देशनाधर्माः समास्तैरेव, तेऽपि खसमाः खसमत्वेन प्रतिभासादित्यर्थः । अत एव अक्रीडाः न हि खसमाः क्रीडन्ति, क्रीडा वा कुतः खसमाः । यतस्तेषां मायया सभावाः समानरूपाः प्रतिभासन्ते तथा परिच्छेदात्, तुल्यरवः प्रतिशब्दः, तदात्मकाः शब्दास्तुल्यरवधर्मास्तैः समाः प्रतिभासमात्रत्वात्, समागमः संघातः, तदभावादसमागमा अंशा वर्णा एषामिति, असमागमांशा धर्माः वर्णानां क्रमेणोच्चारणादुच्चरितप्रध्वंसित्वाच्च ।

असंहताश्च वर्णा न वाचका अवाचकाश्च न धर्माः । तस्मात् खसमा धर्माः । अत एव स्वतः प्रकृत्या वीणासमा वीणाध्वनिसमा अवाचकशब्दत्वान्निरभिसन्धित्वाच्च तस्याः । [**कअजोअसमा** इति । कं जलं स्वार्थे कः प्रत्ययः[4] ।] द्योतश्चन्द्रः जलचन्द्रसमा इत्यर्थः । अथवा द्योतः प्रदीपः कृतद्योतेन समाः । अन्धकारे तमोगतस्य लोकस्य ज्ञानालोकभूता इत्यर्थः । अथ तेनैषां जगदर्थसाधनत्वं ख्यापितम् । शेषेण विशुद्धत्वम्, तस्मात् त्वमपि व्युत्थाय धर्मान् देशयेति समुदायार्थः । **जो** इत्यादि ।

१. भोटे निष्पन्दे । क. ख. न्दे: । २. क. ख. ङ्ग ।
३. क. ख. नो । ४. कोष्ठांशः भोटे नास्ति ।

**यो धर्मालोक आकाशसमः कुर्वन्ति वज्रास्तस्मिन् रूपसमाः।**
**रूपादिकामसुखाक्षयदो जलधीन्द्रतुल्यवहुस्तस्मिन्[१] वज्रमयः[२] ॥**

**समरसीभूतः सर्वबुद्धानां धर्म एव लोकः** प्रकाशरूपत्वात्, **आकाशसमश्च** निराभासात्। तस्मिन्नाविर्भूय वज्रा वज्रसत्वा विकुर्वन्ति सत्वार्थधर्मान् दर्शयन्ति। किं ते रूपस्वभावानेत्याह—**रूपसमा** इति। रूपप्रतिभासमात्रत्वेन तैरात्मनः परिच्छेदात्। तेषां वज्राणां नयो मण्डलम्। तस्मिन् कीदृश इत्याह—**रूपादित्यादि**। रूपादयः कामाः पञ्च तैः सुखमक्षयं तद्ददातीति तथोक्तः। जलधिः सरित्तडागादिः। अस्मिन्निन्द्रश्चन्द्रस्तेन तुल्यः प्रतिविम्बसमत्वेन परिच्छेदात्। तदेवं सर्व एव खसमा बुद्धाः सत्वार्थाय देहं देहिमण्डलं च दर्शयन्ति। तस्मात् त्वमप्युभयं दर्शयेति भावः। **वहु** इत्यादि। वहु योगपीठस्तत्र वज्रनयः वहुरूपधारी, तत्र वज्रमयः स्फारयन्ति सत्वानात्मसमान्, तत्र वज्रो ददाति वरान् धातुसमान्। बहूनि योगपीठान्यस्येति तथोक्तः। तेषु तद्भावाद्वज्रमयो वज्रात्मा वज्रधरो विनेयाशयभेदेन धारयति। तत्रैव रूपभेदात् स्फारयति तत एव सत्त्वान् बुद्धादीनात्मसमान् प्रभावतस्तन्निष्पन्दत्वात् **तहिं इति** तैः सत्वैः वज्रो वज्रधरः। **देइ ददाति,** वरानिति ईप्सितान्, बुद्धत्वादीन्, धातुसमानिति गोत्रसमान्, यथागोत्रमित्यर्थः। **जेइ** इति क्वचित्पाठः जयति विनयति वरधातून्, त्रिसाहस्रलोकधातून्, समतुल्यकालमित्येष तत्रार्थः। इदृशी परार्थक्रिया वज्रधरस्य तां प्रवर्तयेति भावः। एवं देवीसंख्यादिज्ञानाय चतुर्गीतकं चतुर्देवीभ्यो देशयित्वा ता एव नियोक्तुमाह—**ए इत्यादि**। [अनयोः प्रतिपादं चत्वारो गणाश्चतुर्मात्राः आणेइ वज्जेति ह्रस्वत्वं पूरणार्थम्[३]।] हे चतुर्देव्य एतद्गीतं भणितमनेन खसमे समाधौ निविष्टं चोदयतश्चा[४]धिपं य एतद्गीतं शृणोति शब्दशरीरेण पश्यति। **एकमनसेति** समाहितेन गाहतेऽथशरीरेण चित्तमसे(स्ये)ति जल्पेन मनसा। ततः किमित्याह—**एह** इत्यादि। एतद्गीतमाकाशसमानं तथता प्रतिभासात्। रूपसमानं वज्रधरमानयति, तदर्थं च वज्रमयं धर्मद्रवात्मकं चित्तं परिबोधयति, व्युत्थापयति, एकस्वभावेन तन्त्रं वज्रनयमानयति। अथ वज्रस्य वज्रनयस्य चोत्पत्तौ कतमे मन्त्रा इत्याह—**वज्जपएण** इत्यादि [अस्यां प्रतिपादं त्रयोगणाश्चतुर्मात्राः[५]।] वज्रपदं वज्रधरबीजं हूंकारः। तेनान्य स्वभावं भिन्नं बीजम्।

१. क. ख. तस्मिन्। २. क. ख. न। तथा कोष्ठांशः भोटे नास्ति।
३. कोष्ठांशः भोटे नास्ति। ४. ख. स्व। ५. कोष्ठांशः भोटे नास्ति।





एकस्माद्बीजात् धर्मद्रवाद् भावयतीति सम्बन्धः। तेनैव धर्मद्रवेण हूंकारपञ्चकं भावयतीत्यर्थः। किं तेनेत्याह—**चित्ते**त्यादि। चित्तं नीलवज्रधरः, स मध्यगतो यस्मिन् **तन्मण्डलं सर्वं भावयति**। [अपभ्रंशे हि सर्वशब्दस्य[१] त्रीणि रूपाणि, रेफलोपे कृते **द्विवचनविकल्पः**। असति द्विवचने पूर्वस्याकारस्य दीर्घत्वं वस्य च ह्रस्वं वा। सब्ब साव साह[२]] कथं धर्मद्रवाद् बीजपञ्चकभावनेत्याह—**धम्म** इत्यादि। [अनुष्टुभमिदं पथ्यावक्त्रं नाम, अत्र च।

**लघुनी सह न स्यातां पादेषु प्रथमात् परे।**
**अयुजोर्योयुजोर्जस्तु चतुर्थादक्षरात् परे[३] ॥]**

मण्डलं कूटागारं तस्य मध्यस्थं यत् पद्मोत्तमं तस्मिन् भावना तथोक्ता धर्मस्य तथा भावना। **धम्ममण्डलमज्जाच्छपदुमुत्तमभावणा। तस्स चित्तअ** इति। तस्य धर्मस्य चित्तकं भेदकं भावयतीति शेषः कर्णिकायां दिग्दलेषु च तस्य धर्मस्य चन्द्रारूढहूंकाररूपेण परिणामात्। ततः किं कुर्यादित्याह—**माअ** इत्यादि। अनयोः प्रतिपादं त्रयो गणाः मायास्वभावस्य सर्वस्य खलु रूपस्य निरूपणं कुरुतेति शेषः। चित्तस्य वज्रस्वभावस्यैकस्वभावं भो चिन्तयत वज्रनयम्। ननु चित्तस्य स्वरूपमेव वज्रनयो, नासौ मायेत्यत आह—**चित्तहो** इत्यादि। आकाराणामसत्वमेकानेकस्वभावविरहात्, तस्माच्चित्तं खेन सरूपम्। तस्य चित्तनयोऽस्वभावः[४] वज्रनयस्य चित्तनयश्चित्तस्वरूपतोऽस्वभावोऽस्वरूपं मिथ्येत्यर्थः। ननु अन्यो वज्रो अन्यश्च वज्रनयः प्रतिभासभेदात्, तत्कथं एकस्वभावतेत्याह, **उभय** इत्यादि। नानास्वभावस्य नास्ति नयो न्यायः खसमे प्रकाशमात्रे आकाराणामलीकत्वात्। तस्मिन् विहारे सति वज्र एव खसम वज्रधर एव स्वभावः, शेषं माया अलीकत्वात्। **वज्जसत्त** इत्यादि। [अनयोः प्रतिपादं चत्वारो गणाश्चतुर्मात्राः[५]।] आद्यया कृत्रिमाकृत्रिमं रूपमाह, द्वितीयया चित्तवाग्गुह्यं हे **वज्र** सत्वत्वमेकस्वभावः। लोकनिमित्तं क्रियते मायास्वभावस्त्वयेति शेषः। कथमित्याह—**सत्त**मित्यादि। विनीयन्ते सत्वा अनेनेति विनयो मूर्तिभेदः। सत्वान् बोधयति विनयस्वभावः। हे वज्रसत्व त्वमेकस्वभाव एव प्रकृतिः। देवी भादेवी। **वोल्लइ** वदति **वज्ज** वज्रधरं **अडेगुह**[६] इति गुप्तं गूढम्, चित्तवाग्गुह्यमित्यर्थः। **अब्भन्तरे** इति स्वहृदि **रमन्त**उं इति रममाणः। चित्तस्वभावेन चन्द्रमण्डलस्थविश्व-

१. क. सर्वस्य। २,३. कोष्ठांश भोटे नास्ति। ४. क. ख. विनयो। ५. कोष्ठांशः भोटे नास्ति। ६. क. ग्र।

वज्राकारेण **तहिँज** इति हृदि खलु चित्तनिगूढ इति विश्ववज्रवरटके[1] गोपितम्। **धम्मइ सिद्धउं** इति मन्त्रोऽपि सृष्टः, स च हूंकारः। **स्फरणमधिकृत्याह—स्फार** इत्यादि।

**एकस्यामयुजोरष्टौ मात्रायुजोर्द्वाविंश।**
**अपरस्यामयुयोश्चतुर्दश युजोर्द्वाविंश[2]।**

स्फारयति वज्रोहृन्मन्त्रः सत्वानाकाशस्वभावान् मायोपमान्। पुनः संहरति यस्माच्चित्तस्यैका प्रकृतिः। चित्तैर्निरूप्यमाणे[3] हि यस्मात् सर्वमेवसमं तुल्यं पश्यामि मायोपमत्वेन, पुनःपुनः सत्वान् संगतान् संहृतानेकाकारान् करोमि। अनेन सर्वेणैतदुक्तं भवति— इह सप्तविधानुत्तरपूजा-शरणगमन-बोधिचित्तोत्पादपूर्वकं चित्तमात्रतामधिमुच्य, खममं बोधिचित्तमामुखीकृत्य ॐ **शून्यताज्ञानवज्रस्वभावात्मकोऽहम्** इति अधितिष्ठेत्। तदनु चुट्कारजां चुन्दादेवीं चन्द्रवद्धवलां चतुर्भुजां समाधिमुद्रया पात्रधरामितरभुजाभ्यामक्षमालापुस्तकधरां जटामुकुटिनीं वज्रपर्यङ्केण महापद्मचन्द्रे निषण्णां लोकधातुप्रमाणां विभाव्य, तत्कमलकर्णिकायां मुक्ताफलस्वच्छधवलायां धर्मोदयाकारधारिण्यां भ्रूँकारजवैरोचनपरिणतं परमोज्ज्वलपञ्चरत्नमयं कूटागारम्।

**चतुरस्रं चतुर्द्वारं चतुस्तोरणशोभितम्।**
**वेदीचतुष्टये चारुपूजाग्राप्सरोगणम्॥**
**हारार्द्धहारपट्टस्रक्चामरादिविभूषितम्।**
**मारुतोद्धूतविश्वाग्रपताकाघण्टानादितम्॥**

ध्यात्वा, तन्मध्ये रक्तकमलमष्टदलं विचिन्त्य तत्कर्णिकासूर्यमण्डले हूँकारेण भगवन्तमक्षोभ्यमिन्द्रनीलनिभं मणिरत्नाङ्कजटामुकुटिनं क्रुद्धमीषद्दंष्ट्रिणं विचित्रवस्त्राभरणं **वज्र**वज्रघण्टाधरोभयभुजालिङ्गितस्वाभविद्यं विभाव्य, मायासुरतध्वनिना दिग्भ्यः समाकृष्य, मुखेन प्रवेश्य तथागतान् विलीय कमलोदरगतान् महासुखमयाँश्चिन्तयेत्। तत्प्रभाविलीनौ च मातापितरौ विलोक्य तत्कमलमिन्दुद्रवेणैव बुद्धानां धर्मकायेन पूर्णं पश्येत्। तदनु शान्तिः मोक्षा सुषमा असमा चेति चतस्रो देवताश्चतुर्षुद्वारचन्द्रेषु निषद्य धर्मकायात्मकं महावज्रधरं तस्मान्निष्प्रपञ्चमहामोक्षसुखसमाधेर्व्युत्थापनार्थकरणाय चतुर्गीतिकेन चोदयेयुः।

**सुण्णा इएअकअ धम्मसमा, भासन्ति मोक्ष-सुषमा-असमा।**
**मायानुकर्प्पहि बुद्धसमा, कीडन्ति सव्व खसमा असमा॥१॥**
(लुरुलुरुभ्यो रुद्[4])

१. क. ध रटके। २. कोष्ठांकः भोटे नास्ति। ३. क. त्त। ४. भो० रुलुरुलुभ्यो रूट्।





**मायासहावकअजोअसमा, भासन्ति तुल्लरवधम्मसमा।**
**धम्मा अकीडखसमाणसमा, असमागम(मं)स सउ वीणसमा॥२॥**
(लुरुलुरुभ्योरुद्)

**जो धम्म लोअ आ आससमा, कुव्वन्ति वज्ज तहिँ रूवसमा।**
**रूवादिकामसुहअकम्पअवो, जलहिन्दुतुल्ल तहिँ वज्जणडे(ओ)॥३॥**
(लुरुलुरुभ्योरुद्)

**वहजोअपीट(ठ) तहिँ वज्जणडे(ओ), बहुरूवधारि तहिँ वज्जमडे(ओ)।**
**फारन्ति सत्त अघाणसमं, तहिँ वज्जदेइ वरधाउसमं[1]॥४॥**
(लुरुलुरुभ्योरुद्)

इति गीतिकानि गीत्वा चतस्रो देव्यः स्वदिग्दलद्रवेषु प्रविश्य विलीय समरसी भवेयुः, गीतिकानुरोधाच्च तेन चन्द्रद्रवेण कर्णिका पूर्वादिदलेषु चन्द्रासनाः पञ्चहूँकारा भवेयुः। नीलसितनीलरक्तहरिता यथाक्रमं कर्णिकाहूँकारेण विश्ववज्रं चिन्तयेत्, पूर्वादिहूँकारैः सवर्णान् पञ्चसूकवज्रान्, वरटकगर्भोत्पन्नबीजकिरणस्फरणैर्जगद्धितानि कृत्वा तानि वज्राणि यथायोगं षड्देवतारूपेण परिणमेयुः। तत्र विश्ववज्रबीजपरिणामो भगवान् वज्रसत्वः। इन्द्रनीलनिभो जटामुकुटी नवयौवनो विचित्रवस्त्राभरणो वज्रपर्यङ्कनिषण्णः स्वाभभादेवीमुभाभ्यां भुजाभ्यां विश्ववज्रविश्ववज्राङ्कघण्टाधराभ्यां परिष्वज्य व्यवस्थितो वीरश्रृङ्गाररसः। पूर्वदले सितवज्रबीजोद्भवा शान्तिः सितवर्णा, दक्षिणदले नीलवज्रबीजोद्भवा मोक्षा नीलवर्णा; पश्चिमदले रक्तवज्रबीजोद्भवा सुषमा पद्मरागवर्णा, उत्तरदले हरितवज्रबीजोद्भवा असमा मरकतवर्णा। एताश्चतस्रो नवयौवनाः श्रृङ्गारवीररसा रत्नमुकुटिन्यो विचित्रवस्त्राभरणाः सस्मितं भगवति प्रेक्षितकटाक्षाः, दक्षिणेन सवर्णपञ्चसूकवज्रधराः, वामेन चक्ररक्तोत्पलकमलनीलोत्पलधराः, सत्त्वस्य[2] पर्यङ्किण्यः। तदनु भगवतो भादेव्याश्च स्तनान्तरचन्द्रविश्ववज्रवरटकचन्द्रे नीलहूँकारं किरणमालिनं दृष्ट्वा ॐ **धर्मधातुस्वभावात्मकोऽहमित्यधितिष्ठेत्**। शिरःकण्ठहृच्चन्द्रेषु प्रणवाकारहूंकारान् सितरक्तकृष्णान् विचिन्त्य मन्त्रैरधितिष्ठेत्, ॐ **सर्वतथागतकायवज्रस्वभावात्मकोऽहम्**, ॐ **सर्वतथागतवाग्वज्र-**

१. इति गीतिकानां मूलत अपभ्रंशपाठ एवोपलभ्यते भोटग्रन्थेषु।
२. ख. स्य नास्ति.

**स्वभावात्मकोऽहम्, ॐ सर्वतथागतचित्तवज्रस्वभावात्मकोऽहम्।** चतुर्देवीनां स्तनान्तर-चन्द्रस्थितसुवर्णपञ्चसूकवज्रवरटकचन्द्रेषु स्वबीजं शिरःकण्ठहृच्चन्द्रेषु च प्रणवादीन् पश्येत्। ततः सर्वदेवतानां कायवाक्चित्तानि यथातत्त्वं खसमानि यथाकार-मसत्वादनुत्पन्नानि निःस्वभावानि निश्चित्य गाथयाऽधितिष्ठेत्।

**कायाक्षरमनुत्पन्नं वाक्चित्तमलक्षणम्।**
**खवज्रकल्पनाभूतं मिथ्यासंग्रहसंग्रहमिति॥**
**(गु. स. १७-३६)**

ततो निजबीजप्रभाभिर्दशदिग्गतभिर्ज्ञानमण्डलमानीय पुरस्तात् अन्तरिक्षेऽव-स्थाप्य स्वहृज्जप्त(ब्द)मर्घं दत्वा **अः हूँ व** होरित्येभिर्ज्ञानमण्डलमाकृष्य, प्रवेश्य, वद्ध्वा वशीकृत्य समयमण्डलं तेन सहैकीभूतं पश्येत्। ततो हृन्मन्त्रकिरणाकृष्टैस्तथा-गतैः ज्ञानाम्बुपूर्णरत्नकलशधारिभिरात्मानं मण्डलं चाभिषिच्यमानमधिमुच्य, तदम्बु-निष्पन्नान् देवतानां मुकुटेषु कुलतथागतान् पश्येत्। तत्रात्मनो जटामुकुटोपरि भगवन्तमक्षोभ्यमिन्द्रनीलनिभं भूस्पर्शमुद्रया स्थितं, ललाटोपरि वैरोचनं चन्द्रनिभं वोध्यग्रीमुद्रया स्थितं, दक्षिणकर्णोपरि रत्नसम्भवं कनकवर्णं वरदमुद्रया स्थितं, ग्रीवा-पृष्ठोपरि अमिताभं पद्मरागनिभं समाधिमुद्रया स्थितं, वामकर्णोपरि अमोघसिद्धि मरकताभमभयमुद्रया स्थितं चिन्तयेत्। एवं भादेव्याश्चतुर्देवी रत्नमुकुटोपरि यथाक्रमं वैरोचनाक्षोभ्यामितायुरमोघसिद्धीन्। ततो हृन्मन्त्रकिरणनिर्गताभिर्देवीभिः स्फरण-योगेन गगनतलव्यापिनीभिः भगवन्तं सपरिवारं पूजयेत्। ततो गुह्यपूजया पञ्चवीर्य-पूजया च विधिवत् संपूज्य, ॐ **सर्वतथागतपूजावज्रस्वभात्मकोऽहमि**त्यधितिष्ठेत्। ततो गाथात्रयेण चतुर्देवीमुखैर्भगवन्तं स्तुय त्।

**पञ्चबुद्ध मउड स्सअ जस्स अ तिहुअणसार।**
**आइबुद्धकअभावडो(हो) तस्सडो(हो) खसमपआर॥१॥**

**पञ्चबुद्धमउडत स्सअ जस्स अ धम्मसहाव।**
**वज्जसत्तपणवीअउ तिहुअणधम्मपहाव॥२॥**

**वज्जसत्तपणवान्तं पुण्ण वि होइ अनन्त।**
**वज्जसत्तपविज्जउ लब्भइ धम्ममहन्त॥३॥**

१. गु. स. पदेति पाठः B.S.T. No. 9.





ततः परमसुखसमर्पितमात्मानं मण्डलं च यावदिच्छं भावयेत्। ततो हृन्मन्त्र-रश्मिमुखेभ्यः सर्वतथागतान् संस्फ.र्य जगत्तन्मयीकृत्य चित्तस्य विश्वरूपतां चिन्तयेत्। पुनस्तान् संहृत्य चित्तस्यैकस्वभावतां पश्येत्। अस्मिन् तन्त्रे समाधित्रयव्यवहारो न विद्यते, एक एवात्र समाधिर्मण्डलराजाग्री नाम। भावनया **खिन्नो** मन्त्रं जपेत्। विश्ववज्रवरटकान्तर्गतं **हृदयमेव मन्त्रं हूँ, उपहृदयं वा अनुरागयामि उभयं वा अनुरागयामि हूँ, सप्तदशाक्षरं वा ॐ महासुखवज्रसत्वजः हूँ वं होः सुरतस्त्वं** अन्यद्वा यथार्हं मन्त्रविद्यादिकं जपेत्। ततः प्रणिधानानि कुर्यात्। समासतस्तु गाथाद्वयेन—

**सर्वस्वं सर्वबुद्धानां महावज्रभृतः पदम्।**
**एभिर्लभेयं कुशलैर्लम्भये पञ्च तज्जगत्॥१॥**
**चर्या संबोधये या च संबुद्धानां च या पुनः।**
**वर्णिता बोधिवज्रेण सा चर्या तु द्वयी मम॥२॥**

ततः स्वहृन्मन्त्रे तत्किरणाकृष्टं समयमण्डलमन्तर्भाव्य तत उत्थायात्मनि स्वदेवताफटकारेण भूतचतुष्टये देवीचतुष्टयाधिमोक्षेण यथासुखं विहरेत्।

अयमारम्भः प्रथमसन्ध्यायाम्। सध्यान्तरे तु झटित्यात्मानं सविद्यस्वदेवतारूपं सर्वनिष्पन्नमालम्ब्य स्वहृन्मन्त्रात् क्रमेण चतस्रो देवीरुत्सृज्य यथास्थानं निवेश्य कायाधिष्ठानादि सर्वं पूर्ववत् कुर्यात्। एवं पश्चिमसन्ध्यायां ज्ञानमण्डलं सम्पूज्यार्घ्यं दत्वा ॐ वज्रमुरित्यनेन विसृज्य आत्मरक्षां कृत्वा समयमण्डलं स्वमन्त्रेऽन्तर्भावयेत्। निद्राकाले निराभासमनन्तं ज्ञानमामुखीकृत्य सुप्यात्। चतुर्देवी चतुर्गीतिचोदितश्च निद्रात उत्तिष्ठेत्। एवं प्रत्यहं कुर्याद् यावत्सिद्धिनिमित्तानि पश्येदिति। चित्तप्रधान-मण्डलं चित्तमण्डलं तद् द्योतकः पटलः।

खसमायां खसमतन्त्रस्य टीकायां चित्तमण्डलपटलो द्वितीयः॥

वाङ्मण्डलं वक्तव्यम्। वाक् प्रज्ञा, चित्तमुपायः, प्रज्ञोपाययोरद्वयीभावो वाङ्मण्डलम्; तच्च प्रज्ञाप्रधानम्। ततः तद्भादेवीप्रस्तोतुमाह,—**दिअ** इत्यादि। [अत्र तिसृणां द्विपदिकानां प्रतिपादं चत्वारो गणाश्चतुर्मात्राः[१]।] द्विजा ब्राह्मणास्तेषां

१. कोष्ठांशः भोटे नास्ति।

चाण्डालानां च तुल्य[1] स्वभावः विज्ञानमात्रत्वात्तेषां भेदकानामाकाराणामसत्वाच्च। अनेनोदाहरणेन बुद्धेन कथितो धर्माणां स्वभावः प्रकृतिः प्रकाशमात्रता खसमाः।

ननु भावानामनेकोऽपि स्वभावः प्रतिभाससिद्धः, एकोऽपि अप्रकाशात्मनः प्रतिभासायोगात्। तत्कथमेकत्वं गीयते न नानात्वमित्याह—**एअ** इत्यादि। एकस्वभावश्चित्तमात्रता तस्य स्थितः सद्भावः परमार्थत्वात्, नानेकस्य कल्पितत्वात्। तस्मिन् सति कथयति वज्री तुल्यस्वभावम्। उदाहरणान्तरमाह—**ब्राह्मणेत्यादिना**। ब्राह्मणकुक्कुरावेकस्वभावौ। अस्थ्नोर्वेशस्य च कटककुण्डलादेर्माधाभूतत्वात्। [ वज्जपअं इति विलम्बितं कार्यम्[2]। ] वज्रपदं दृढं रूपं चित्तमात्रता, तस्मिन् ब्राह्मण कुक्कुरादौ सत्यं परमार्थः। अथ तत्र तुल्यस्वभावः केन दृष्ट इत्याह—[ **मइ जो इआ**[3] ] मया दृष्टः। उदाहरणान्तरमाह—**मुत्त** इत्यादि। देवीं भादेवीं, **तहिं** इति तस्यामेकस्वभावतायाम् **जोअ** सभावेति [ विलम्बितेन पूरणीयम्[4]। ] योगः समाधिः। **तहिं** इति तस्मिन् योगे, **सब्ब तुम्ह** इति सर्वा यूयं चतस्रो देव्य इत्यर्थः। भावेन वज्रसत्वेन एकस्वभावाः सत्यः शोभन्ते। प्रभाव्यते सन्दर्शयते इति प्रभावः। शरीरं **एकशरीरा** इत्यर्थः **तुल्ल** इत्यादि। [ अस्यां प्रतिपादं चतुर्दशमात्राः[5] ] तुल्यस्वभावेऽर्द्धद्रवत्वात् एकमना एकमन्त्रः। **वज्जो** विबुध्यतां वज्रसत्वो विबुध्यतां, **एकजन** एकाकी। मातापितरौ क्व गताविति चेदाह—**तहिं** इत्यादि। तस्मिन् धर्मद्रवे नष्टौ द्वेषतत्स्वभावौ अक्षोभ्यतद्विद्ये। **अद्धाङ्गेनेति** अर्द्धशरीरेण धर्मस्य वज्रसत्वस्य प्रभावः प्रभावना। [केचिद् वाक्यमेवं पठन्ति—अद्धे अङ्गे इति तेषां चतुर्थः पादः षोडशमात्रः स्यात्[6]। ] अपरमर्द्धं किमित्याह—**वज्जदारु** इत्यादि। [ अनयोः प्रतिपादं त्रयो गणाश्चतुर्मात्राः। **वज्जहो** इति ह्रस्वत्वेन चतुर्मात्रम्, **गण** इति बिलम्बितेन त्रिमात्रम्[7]। ] **वज्जदारा** इति वज्रभार्या भादेवी तस्मिन् धर्मप्रभावने योगिना दीयते वज्रस्य वज्रधरस्य एकस्वभावा एकशरीरा, तेनैव सह स्वाभयैव वामार्द्धपूरणात्। कदा तस्योत्पत्तिरित्याह—**वज्जहो** इत्यादि। वज्रस्य धर्मद्रवस्य रुणरुणायमानेन चतुर्देवीचतुर्गीतकेन वर्णनं स्तुतिः क्रियते यावत्तावत्। तदनन्तरमेव किं धर्मप्रभाव इति वर्तते। अथ चोदकं देवीचतुष्टयं क्व गच्छतीत्याह **देवहो** इत्यादि। देवस्य वज्रसत्त्वस्य वामेनोर्ध्वेन (वामेनार्धेन) भादेवीभागेनैकीकृत्य ताः पश्येदित्यर्थः। ननु वज्रसत्वोऽस्माभिर्भावनीयः इदं पुनरन्यदेव च न स्त्री न पुमानित्यत—आह, **वज्जसत्ते**त्यादि। वज्रसत्त्व एवायं

१. क. ल्यं। २-७. कोष्ठांशाः भोटे न सन्ति।





प्रणम्यतां भाव्यताम्, मम वचनं प्रमाणं क्रियताम्, यस्मादहमपि स एव भगवानिति भावः। तदुक्तं भवति सप्तविधानुत्तरपूजादिक्रमेण खसमं बोधिचित्तमामुखीकृत्य ॐकारेण त्रिसाहस्रप्रमाणकायां भगवतीं चुन्दां विचिन्त्य, तत्कमलकर्णिकायां वैरोचनपरिणामजं कूटागारं विभाव्य तन्मध्यरक्ताष्टदलकमलकर्णिकासूर्यमण्डले भगवन्तमक्षोभ्यं स्वाभविद्याङ्गसङ्गिनं ध्यात्वा सर्वबुद्धान् प्रवेश्य विलीय कमलोदरगतान् विलोक्य तत्रैव प्रज्ञोपायौ विलीय समरसीभूतौ दृष्ट्वा चतुर्देवीचतुर्गीतकचोदितधर्मद्रवसंहारजचन्द्रमण्डलमध्योत्पन्नरक्तहूंकारजविश्ववज्रवरटके तद्बीजं विचिन्त्य तत्परिणामं भगवन्तं दक्षिणार्द्धेन पुरुषरूपधरं वामार्द्धेन भादेवीरूपधरं पद्मरागनिभं वामे तुङ्गस्तनं वामार्द्धे ललाटे अलकशोभितं जटामुकुटिनं विचित्राभरणाम्बरं शृंगाररसं विचिन्त्य चतस्रो देवीस्तस्मिन्नेव वामार्द्धे प्रविश्यैकरसीभूतांश्चिन्तयेत्। शेषं पञ्चबुद्धमुकुटादिकं यथायोगं पूर्ववत्। वाङ्मडलद्योतकः पटलस्तथोक्तः।

खसमायां खसमतन्त्रस्य टीकायां वाङ्मण्डलपटलस्तृतीयः॥

कायमण्डलं वक्तव्यम्। तत्र कायेन कायपुष्टिः परः समयस्तमाह—**हत्थी**त्यादि। [अनयोः प्रतिपादं चत्वारो गणाः[1]] खसमस्वभाव इति वज्रसत्त्वयोगवान्। **जोइ** इति हे योगिन्, भावना चित्तेन सहितमेकाग्रमन एकमनः। वज्रधरे एकमनस्तेन सिध्यति। **रूवे सवाण** इति वज्रसत्त्वरूपाकारम्, **रूवसमाण** इति क्वचित्पाठः, इति रूपसाम्येनेति तत्रार्थः। अथ शान्तिदेवीगाथाचतुष्टयेन तथतां भाषते, तथतास्वभावात्तस्याः[2]। [आसां प्रतिपादं त्रयो गणाः[3]।] **कुणन्तउ** इति कुर्वताम्, **एअ** इति एवं यथा वक्ष्यति। **धम्मसमा** इति धर्माः समाः। **समीअउ** इति समीयन्तां सम्यग् ज्ञायन्तां, बहुत्वेऽप्येकवचनम्। **एअ विआर** इति, एवं विचारो निश्चयः। एष देवो वज्रसत्त्वः वैरोचनः शाश्वतः, देव्यः पञ्च। एते एकस्वभावाः। नन्वक्षोभ्य इत्युच्यतां न तु वैरोचन इत्यत आह—**तुल्ल** इत्यादि। समचित्तस्य योगिन एकरसो धर्मकायः सिध्यति। ततो नेह सत्वादक्षोभ्यात् प्रभा(भ)व उत्पादना। किं तर्हि वैरोचनात् प्रसिद्धनियमखण्डनेन समताद्योतनात्? अथ वैरोचनादुत्पत्तौ को गुणः? कायमण्डलतत्त्व[4]संहर्तुमाह—**वज्जसत्त**

१. कोष्ठांशः भोटे नास्ति। २. ख भावत्वा।
३. कोष्ठांशः भोटे नास्ति। ४. ख. मुसंप।

इत्यादि । सर्व एते एकस्वभावाश्चिन्त्याः । कथं पूर्ववच्चुन्दाकमलकर्णिकायां वैरोचन-परिणतकूटागारमध्यासनकमले वैरोचन-तत्स्वाभ(भा)याः सुरतोद्भवद्रवे तयोर्विलये । उत्थाय चतुर्देवीविलयानन्तरं द्रवघनीभावजे [1]चन्द्रे सितहूंकारजस्य सितवज्रधरस्य भावनात् । एकस्वभावाद् धर्मकायात् । वज्रनयो वज्रयानम् । [2]योगपीठस्य तर्हि कोऽर्थ इत्याह—**चुन्दे**त्यादि । भावानां सर्वधर्माणां यः स्वभावः प्रकृतिः, शून्यता सा चुन्दा । वज्रसत्त्वः तत्र किं करोतीत्याह—तस्मिन् योगपीठे रूपी सदेहः सन् पश्यत्येकं स्वभावं भावानाम् । **भावण** इति भावना, वैरोचनः शाश्वतः । **देविहो** इति देव्याः (व्यः) सत्यः परमार्थो वज्री तस्योत्पत्तिम्, उत्पत्तिर्हि कायेन । कायश्च शाश्वतस्तस्मात् स एवोत्पत्ति-माचष्टे । कथमित्याह—**एससो** इत्यादि । [ द्विपदिकाद्वयं अत्रायुजौ चतुर्दशमात्रौ युजौ द्वादशमात्रौ[3] ] **ए** इति योगी । **ससिमण्डलमज्झट्ठिउ** इति धर्मद्रवसंहार-जस्य चन्द्रमण्डलस्य **मध्ये** स्थितं वज्रस्य वज्रधरस्य मन्त्रं वीजं सितहूंकारं वज्रं विभावयत्येकमनाः । तेन मन्त्रेण तिसृ इति प्रतिपार्श्वत्रिसूचिकं द्वादशसूचिकमित्यर्थः । **जलन्तउं** इति ज्वलत् [ क्वचित् पाठः । **चित्तइ वज्जसहाव वज्जविभावइ एअमणा तिसृइ वज्जजलन्तउ इति** । तत्रापि स एवार्थः । किन्तु तिसृ इति द्रुतेन चतुर्मात्रं यमकं च न स्यात्[4] ] **मज्जट्ठिअउं** इति मध्यस्थितं स्वार्थे कः । **वज्जसहावेति**–वज्रधरमूर्त्तिम्, **एम्मइ** इति एवं मया वज्रनयो वज्रधरोत्पत्तिः । **धम्मउं** इति धर्माणाम् ।

खसमायां खसमतन्त्रस्य टीकायां कायमण्डलपटलश्चतुर्थः ॥

धर्मकायादेवदेवतोत्पत्तिरस्तु किं मन्त्रेणेत्याह—**अभावे** इत्यादि । [अत्र त्रीणि द्विपथदिकानि । चतुर्थं त्रिगणम् । अभावे इति द्रुतोच्चारणाच्चतुर्मात्रः[5] ।] अभावोऽवि-कल्पः समाधिः, भावो देहः न भाव्यते न जल्प्यते, न हि स्वप्नादपि प्रबुध्यमानोऽनुत्पन्न एव विकल्पे धावति । तद्वद्धर्मकायादपि विना मन्त्रेण न देहोत्पत्तिः । **अम्महो** इति स्त्री सम्बोधनं भावयति निरूपयतीति भावो मन्त्रः । **एअ** इति एवं मन्त्रेणेत्यर्थः । **धम्मनिरूवज्जउ** इति धर्मे निरूप्यमाणे चित्तादिति मन्त्रव्यवहृतादविकल्पात् । भावो देहः **चित्तहोभास**[6] इत्यादिना युक्त्यन्तरमाह । चित्तादेव निष्प्रपञ्चात् भावे देहस्य नास्ति नयो मोक्षस्तेन च कारणेन क्रियते भावो मन्त्रः । कुतो नास्तीत्याह—

१. क. न्द्र, भोटे न्द्रे पाठः । २. ख. यौ इति अधिकः ।
३-५. कोष्ठांशः भोटे न सन्ति । ६. क. ष ।





**भावेत्यादि**, भावो देहः तत्स्वभावस्य चित्तस्य नास्ति नयो मोक्षः विरोधात् । कीदृशो नयः ? यश्चित्तस्य खसमः स्वभावः, प्रतिष्ठादेहभोगनिर्भासानां विज्ञप्तीनां सह बीजेन परिक्षयात् । संभारो[1] वेधसामर्थ्यात् । पुनः स एव देही भविष्यतीति चेदाह—**चित्ते**त्यादि । मुच्यमानस्य चित्तं विशेषेण शुद्ध्यति अपुनरावृत्या क्षीयते । किं तत् **पुब्बजिह** यथापूर्वमुक्तः प्राक् भ्रान्तिर्भ्रान्तिनिमित्तप्रतिभासश्चासीत् । ततः किमि-त्याह—**कह** इत्यादि । कथं तस्य देहादेरपुनरावृत्या क्षीणस्य भावः क्रियते, नैव विरोधात् । एत(वं)न्तर्हि चित्तस्याकारः प्रकृतिरेवास्तु । ततो विशुद्धमपि चित्तं देहाकारमुत्पत्स्यते । अत्राह—**सिज्झ** इत्यादि । न चासौ भाव इति, न चासौ देहः नयः परमार्थः सिध्यति वाह्यश्चित्तात्मको वा एकानेकस्वभावविरहात् । ततश्च चित्तमाकाशस्वभावमेव आकाराणामलीकत्वात् । अलीकख्यातिश्च भ्रान्तिः । न च मुक्तस्य चित्तस्य भ्रान्तिरस्तीति कुतस्तस्य देहः ? तस्माद् द्रवाद्धर्मकायादन्यदेव तन्निष्पन्दभूतं विज्ञानं देहादिप्रतिभासमुत्पद्यते, स्वाकारमलीकत्वेनात्मानं च मायोप-मत्वेन परिच्छिन्दानमिति भावः । उपसंहरन्नाह—मज्झ इत्यादि । [स्वार्थे कः[2],] निर्विकल्पाद् विकल्पः, ततो देह इति । अनया युक्त्या मध्येऽन्तराले पदं वीजाक्षरं निरूपकम् । एवं मन्त्रव्यवहिताच्चित्तादविकल्पात् क्रियते भावो देहः । एवं वज्रसत्व उत्पद्यते चित्तमण्डलादिनानास्वभावः । **सव्वसत्तपरिभाविअ किज्जइ मोक्खसहाव** इत्युक्तम् । स च मोक्षश्चित्तमात्रमेकरसम् तत्कीदृशं भाव्यमित्याह—**अच्छउ** इत्यादि । अस्यां प्रतिपादं त्रयो गणाः । अच्छं प्रकृतिशुद्धत्वात्, निर्मलमागन्तुकमलक्षयात् । पानीयसाधर्म्यात् पानीयं प्रसब्धि ( प्रश्रब्धिः ? ) सुखद्रावितमित्यर्थः । **तेत्थहो** इति तस्मिन् वज्रसत्वोत्पादेन । **लघुसोध्यं भावेन्तं** इति तेन भावेन तेन देहीकृतेन । **एम्मइ** एतन्मया । **कहि अनिरुत्त**, अकथ्यं कथितम् । [वचेर्भावे क्तः । निष्क्रान्त-मुक्तादिति नि[3]रूक्तम् ।] **अकथ्यं वज्जरहस्स** इत्यादिना समयमाह । [अस्यां चतुर्गणाः पादाः **सोमे** इति ह्रस्व एकारः । आहारे इति आदौ ह्रस्वः सोमेनेति बोधिचित्तेन][4] भाव इति स्वदेहः । **तहिं** इति तस्मिन् सति, वज्रोदकं मद्यम् । **एवं स्वभावमिति** बोधिचित्तस्वभावम्, **चित्तसहाव** इति वज्रसत्त्वयोगस्थः । **धम्म** इत्यादि । [अनयोः पादास्त्रिगणाः[5] ।] धर्मः संघो[6] वज्रोदकम्, इत्येषां तुल्यस्वभावः । वज्रोदकं हि बोधि-चित्तं स एव धर्म आर्यमार्गत्वात्, स एव संघः[7] सवीर्यपुद्गलसंग्राहकत्वात् । वसादीनां च

१. ख. रा । २-५. कोष्ठांशः भोटे न सन्ति । ६.७. ख. ह्य ।

तुल्यस्वभावो बोधिचित्तमेव प्रकाशमात्रत्वात् धर्माणां आकाराणामलीकत्वात्, **डे दे** (?) विक्रियते भावः। अभ्यास[1] आशयो वा योगिभिरिति शेषः। भक्ष्यं भोज्यं शयनासनम्। **सब्बउ** इति सर्वेषामेषां योऽपि समाधिर्निरुक्तः, धर्मद्रवोद्भूतश्चित्तमण्डलादिः। तस्य च एक एवं वा स्वभावो **युतुत** (यदुत) बोधिचित्तम्। अथायमुत्पन्नो रूपी वज्रसत्वः कथं द्रष्टव्य इत्यत आह- **बुद्ध** इत्यादि। [अस्याश्चतुर्गणाः पादाः अभावस्यादौ दीर्घत्वं[2]] **बुद्धेनेति** बोधनत्वेन सर्वं पश्यता त्रीणि कायवाक्चित्तानि बोधिरूपाणि स्वभावोऽस्येति तथोक्तः। क्रियते दृश्यते, परमार्थतः। कीदृशः सर्वधर्माणामभावः खसमं ज्ञानं (न) स्वभावः प्रकृतिरस्येति तथोक्तः आकाराणामसत्वादिति भावः। वज्रो वज्रधरस्तेन मायास्वभावः कथितस्तथापरिच्छेदात्। **खसम होन्ति पडिहाइ सरूव**। यस्मात् खसमः सन् रूपी च प्रतिभाति। अन्ये तु चतुर्थपादं न पठन्ति त्रिपादिक[3]मेतदिति चाहुः। **माअ**[4] इत्यादिना फलमाह। [अस्यां त्रिगणाः पादाः[5]] धर्मः स्वभावः। मायास्वभावं निरूपयता वज्रस्य धर्मकायस्य कृतः प्राग्भारोऽवतारः, अवश्यं तत्प्राप्तेः। विपर्यये दोषमाह—**सत्त** इत्यादिना। सत्वं रूपादिस्वभावं य एनं मन्यते स सत्वस्वभावः, तस्य नास्ति नयो धर्मकायः। अथैनं चित्तमेव मन्यते तस्यापि चित्तस्यैतदेव स्थितं सारं न्याय्यं यदुत मायोपमत्वमाकाराणामलीकत्वात्। स्फरणसंहरणमधिकृत्याह—**एअ** इत्यादि। [अनयोः पादाश्चतुर्गणाः[6]।] आदो तावच्चित्तं मेरुपर्वतसमं क्रियते। उन्नतविपुलप्रभासुरतया नातिविपुलं नाभ्युन्नतं विक्षेपप्रसङ्गात्। नान्धकारम्भ्या-(ध्या)नसिद्धप्रसङ्गात्। पश्चात्तच्चित्तमुत्पाद्यते। **सुद्धबुद्धेति** केवलं बुद्धमयं सर्वतथागतस्फरणैर्व्याप्तत्वात्, पश्चात्तच्चित्तं खिन्नं सत् स मन्त्री संहरति। तस्मिन् संहारे सती मन्त्री स्मरति ध्यायति। सर्वतथागतसंहारेण वज्रधरस्वभावं स्वचित्तं निरूपयेत्। पश्चाच्चित्तं मेरुसमं प्रज्वालयत्यालोकपिण्डरूपेण, तस्मिन्नालोकराशौ वज्रसत्वं(त्व)रूपेण चालयति, तद्देहकोटीशतसहस्रैः पूरणात्। पश्चादाकाशरूपं स्फारयति। वज्रधरवपुषां क्रमेण संहरणात्। एवं स्फरणसंहरणयोः स्वरूपमित्युपसंहारः। तथागतसंहारात् तथागता एव स्फरन्तीति युक्तमिति चेदाह—**सिज्झ** इत्यादि। [अत्रायुजौ त्रिगणौ युजौ द्विगणौ[7]] तस्मिश्चित्ते सिध्यति वज्रसत्व एकरसेन सर्वतथागतसंहारेण अतश्च स्फरणमभ्युपपन्नम्। वज्रधरेण स्फरणस्य कालमाह—**स्थिर** इत्यादिना। [अत्रायुजौ दशमात्रौ युजौ द्वादशमात्रौ[8]] स्थिरं स्फारयति योगी

१. क. भ्यो. २. कोष्ठांशः भोटे नास्ति। ३. ख. द। ४. क. ह।
५-८. कोष्ठांशः भोटे न सन्ति।





अस्थिरं नैव स्फारयेदिति। अस्थिरं स्फारयत्यस्मिन्नफलोभवत्यायासः, फलं च न लभेत् प्रयासश्च भवेदित्यर्थः। अस्मिन् तन्त्रे सुलभा सिद्धिरिति ख्यापयितुं द्विपदीषट्कमाह—**सब्बेत्यादि**। [अत्र त्रिगणाः पादाः[1]] सर्वं सत्यं यथारु[2]तं मया कथितं अत्रेति शेषः। **सिद्धं** प्रकृतिसिद्धत्वात्, यानं बोधिमार्गः, सभावं सतत्त्वम्। अस्तु प्रकृतिसिद्धमिदं यानं चित्तं तु मलिनमस्माकमिति चेदाह—**चित्तेत्यादि**। [द्विपथकस्य द्विपादकमेतत्[3]।] चित्तं मा दूषयत खसमं प्रकृतिशुद्धत्वात्, समं तस्याः प्रकृतेरविकारात्। कथमित्याह—यन्न विलिम्पति कोऽपि मलः, तस्यां प्रकृतौ मलानामागन्तुकत्वात्, आकाशे धूमतमोऽभ्रतुहिनवत्। **जोइ** इत्यादिना देवताबलमाह। [अत्र त्रिगणाः पादाः[4]] हे योगिनः एषा भगवती चुन्दा आदिस्वभावा सर्वबुद्धानुत्पादयति भाविते[5] वज्रप्रभावे। प्रभावनं प्रभाव उत्पादनम्। सा चेद्बुद्धानुत्पादयति किं वज्रधरेणेत्यत आह—**देवी**-त्यादि। [अस्यां चतुर्गणाः पादाः[6]।] देवीनां देवस्य च वज्रधरस्य एक एव स्वभावः तस्य चैता विभूतयः बुद्धैस्तर्हिकोऽर्थ इत्याह—वज्रसत्वो भगवान् बुद्धानामेव प्रभावो विभवः सारः—धर्मकायस्वभावत्वात्। अत एव समूलं बुद्धानां कायद्वयसंगृहीतानाम्। अनादिनिधनत्वाच्च धर्मकायस्य स एव मूलम्, तदेवं वज्रधरसंगृहीतानां त्र्यध्वबुद्धानां अधिष्ठानमिति देवताबलम्। आशयबलं मन्त्रबलं चाह—**अणुणअ**[1] इत्यादिना। अनुनयो मनसः सर्वसत्वेषु हितसुखाशयः। तस्य भावना तृतीयैकवचनस्य हेभावः, तया च सिद्धिरवश्यं हूँकारेण चानुनयार्थेन। तस्मादभिन्नपर्यङ्कैरजस्रमयमेव योगोऽभ्यसनीय इति सूचयन्नाह—**हिअए अ** इत्यादि। [अत्र त्रिगणाः पादाः। ऊरुशब्दस्यान्तेऽपि दीर्घः।] ऊरुर्मम व्यथते पादो मम व्यथते इत्येष ऊरुपादवितर्को मोघः फलविघ्नत्वात्, मोहो वाऽज्ञानप्रभवत्वात्। स हृदये न क्रियते हृदि कर्तुं न युज्यते। ननु सन्ति विघ्नास्तत्कुतः सिद्धिरित्यत्र—आह, **वज्जेत्यादि** इन्द्राग्नियमनैर्ऋतादयो दशसु दिक्षु भूतपतयः सपरिवाराः विघ्नकशः, त्रैलोक्यं तस्य चक्रं समूहः, तद्वज्रप्रभाभिः संयमितं हृद्वज्रनिर्गताः स्फरन्तोज्वलद्वज्राकारा रश्मयो वज्रप्रभाः ताभिः संयमितं निरस्तम्, ततो नात्र विघ्नाः प्रभवन्तीति भावः। क्रोधदेवतायोगैर्विघ्नघातो बलीयानिति, चेदाह—**फार** इत्यादि। [अत्रापि त्रिगणाः पादाः।] स्फारयति योगी नभस्तलक्रोधदेवनानां कोटिसहस्राणि **वज्जहो एक्कसहाव** इति। वज्रधरादभेदाधिमोक्षेण पुनः संहरत्यवश्यं तानि वज्रस्वभावतयैव। एतच्च तन्त्रं खसमार्थप्रधानत्वात्तेनैव-

१. कोष्ठांशः भोटे नास्ति। २. क. द्रु। ३. कोष्ठांशः भोटे नास्ति।
४. कोष्ठांशः भोटे नास्ति। ५. क. भावे। ६. कोष्ठांशः भोटे नास्ति।

व्यपदिश्यते। अतस्तमेवोपसंहर्तुमाह—**चित्ते**त्यादि। [ द्विपथकमेतत्। ] चित्तस्य स्वभावः प्रकृतिस्तथता, तस्यैव बोधिर्नयो बोधिस्तत्त्वं न मलानाम्। ततस्तेषां क्षयेतद-क्षयात् सुलभा बोधिः। ननु बोधिरनन्ता बुद्धधर्मास्ते कथं तत्त्वं तस्येत्यतआह, **बोडिहो** इत्यादि। बोधेर्नयस्तत्त्वं चित्तस्वभाव एव चित्ततथतैव, सैव हि बुद्धानां धर्मकायो बुद्धधर्माणामाश्रयत्वान्नतु बुद्धधर्माः। ते हि तस्य विभवो न स्वरूपम्। यदि तर्हि तथतैव तत्वमुभयोः सा च शून्यता द्वयाभावः। द्वयस्य सदा सर्वत्र चासत्वादत्यन्ता-भावः, शशविषाणवत्। न चात्यन्ताभावो भावानां प्रकृतिः भवति, नापि तस्याः प्रत्यक्षीभावोऽप्रकाशात्मकत्वादित्यत आह—**उभय** इत्यादि। बोधिचित्तं च बोधिश्चेत्यु-भयम्, तस्य स्वभावस्तथता, तस्य चित्तं नयः परमार्थः द्वयरहितं चित्तमेव द्वयशून्यता तन्मात्रस्य भावप्रत्ययेन निर्देशात्। यदि तर्हि चित्तमेवशून्यता, चित्तं चादित एवं भ्रान्तं सैव तस्य प्रकृतिरिति भ्रान्तिरेव बोधिः स्यात्, तच्चायुक्तम्, सवा[1]सनसर्व-भ्रान्तिपरिक्षयलक्षणत्वात्। बोधिरित्यत[2] आह—**चित्तहो** इत्यादि। आगन्तुका हि भ्रान्तिस्तान्निमित्ताश्च मलाः। स्वभावस्तु चित्तस्य खसम एव प्रकाशमात्रत्वात्, आकाराणामसत्वात्, कदाचिदस्तमयादपि कदाचिच्चासत्तयैव परिच्छेदात्। लौकिक-लोकोत्तरतत्पृष्ठलब्धासु चित्तावस्थासु यथाक्रमं यत एवागन्तुकामलास्तत एव सुलभा-बोधिः। तत्रागन्तुकमलशुद्धिः साध्यते प्रकृतिशुद्धिः सिद्धैव। तन्त्रान्तरेषु पटलान्तरेषु च साधारणो योऽर्थस्तस्यद्योतकः पटलः।

**श्रीमत्तन्त्रं खसममनया यन्मयाभ्यर्च्य वाचा,**
**प्राप्तं पुण्यं परिणतशरच्चन्द्रिका चारु कान्ति।**
**तेनाक्षेपं खसममसमं ब्रह्मजैनं व्रजेयम्,**
**विश्वार्थाय प्रभवति गुणज्योतिषां यत्र योगः॥**

**खसमायां खसमतन्त्रस्य टीकायां पञ्चमः पटलः॥**

**समाप्ता चेयं खसमा नाम टीका॥**

**कृतिरियं महापण्डितश्रीरत्नाकरशान्तिपादानाम्॥**

---

१. क. र्व। २. क. धे।



## खसमतन्त्रस्य खसमाटीकायां तन्त्रान्तरोद्धृतानि पद्यानि

(पृ० २३३) यथोक्तं **श्रीगुह्यसमाजे** (१८.५१)—

मोहे द्वेषे च रागे च सदा वज्रे रतिः स्थिता।
उपायः सर्वबुद्धानां बज्रयानमिति स्मृतम्॥

(पृ० २३५) उक्तं **श्रीपरमाद्ये**—

आकाशोत्पादचिह्नत्वादनादिनिधनः परः।
वज्रसत्त्वमयः सत्वो वज्रसत्वः परं सुखम्॥

(पृ० २३५) **सर्वरहस्यतन्त्रे**ऽप्युक्तम्—

न किञ्चिद्धेतुतत्त्वं हि फलतत्त्वं तथैव च।
तत्तत्त्वं तथता ज्ञानं तत्र योगी समाचरेत्॥

(पृ० २३५) **श्रीसमाजे**ऽप्युक्तम्—

कायाक्षरमनुत्पन्नं वाक्चितमलक्षणम्।
खवज्रकल्पनाभूतं मिथ्यासंग्रहसंग्रहम्॥

(श्री समाज १७.३६)

(पृ० २३५) उक्तं च **वज्रशिखरे**—

ततः स्वाभाविकानकायान् संयोगैर्विसृतः पुनः।

❀